RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

॥ ओ३म् ॥

धनहीनो न हीनश्च धनिकः
स सुनिश्चयः।
विद्यारत्नेन यो हीनः स हीनः
सर्ववस्तुषु॥

( चाणक्य-नीति )

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

॥ ओ३म् ॥

दृष्टिपूतं न्यसेत् पादं
वस्त्रपूतं पिबेज्जलम्।
शास्त्रपूतं वदेद् वाक्यं
मनः पुतं समाचरेत्॥

( चाणक्य-नीति )

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

卐 वर्षम्-८ 卐 अंकः-२ ( १६८ ) 卐 १६ जुलाईः २०१८ तः ३१ जुलाईमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## सप्तदशविश्वसंस्कृतसम्मेलनस्यायोजनं कनाडादेशस्य वैंकुवरनगरे सम्पन्नम्

**वैंकरवरतः– , डॉ.राजेन्द्रत्रिपाठी 'रसराजः''**

सप्तदशविश्वसंस्कृतसम्मेलनस्यायोजनं कनाडादेशस्य वैंकुवरनगरे 9 जुलाईतः 13 जुलाई 2018 पर्यन्तं ब्रिटिशकोलम्बियाविश्वविद्यालयस्य परिसरे सम्पन्नम् ।अस्य सम्मेलनलस्योद्घाटनं भारतसर्वकारस्य मानवसंसाधन– विकासमंत्रिणा माननीयश्री प्रकाशजावेडकरमहानुभावेन सम्पादितम्। स्वकीयवक्तव्ये




संस्कृतस्य विकासाय प्रचाराय प्रसाराय च विभागतः तेन पूर्णसाहाय्यं प्रदातुं आश्वासनं प्रदत्तम्। उद्घाटनावसरे विश्वविद्यालयस्य कुलपतिः, संयोजकः अधीशसाथ्ये, अशोक अकलूजकरः, कार्यक्रमस्य अध्यक्षः कुटुम्बशास्त्रिमहोदयः भारतीयदूतावासस्य हाईकमिश्नर श्रीमान् विकास स्वरूपः अथ च तस्मिन् चानसेंटरस्य सभागारे विविधेभ्यः देशेभ्यः समागताः षट्शताधिकविद्वांसः विदुष्यश्च समुपस्थिताः आसन्।

उद्घाटनवसरस्योपरान्तमेव विशेषव्याख्यानसत्रं समायोजितं यस्मिन् मुख्यरूपेण जार्जकॉरडोना– दीप्तित्रिपाठी – अरविन्दशर्ममहोदयाः वक्तारः आसन्। अतः परं अक्षरधाम्नः स्वामिभद्रेशदासमहानुभावेन अक्षरपुरुषोत्तमदर्शनस्य परिचयविषयकं वक्तव्यं प्रकटीकृतम्।

मध्याह्नभोजनोपरान्तम् एकविंशतिविविधविषयानाश्रित्य बुचनॉनबिल्डिंगनामकस्य विविधकक्षेषु सत्राणां संचालनं समायोजितम्। सायंकाले भारतसर्वकारस्य मानवसंसाधनमंत्रिणः समुपस्थितौ नेस्टभवनस्य बैंक्वटसभागारे मधुराहारग्रहणाय सर्वे अतिथयः समाहूताः। सायंकाले सांस्कृतिकसंध्यायां कुटियट्टम्नृत्यनाटिकायाः कार्यक्रमः समायोजितः। द्वितीयदिवसे यथाक्रमं निर्धारितानां सत्राणां समयानुसारेण संचालनं सम्पादितम्। मयापि अर्वाचीनसंस्कृतकाव्यसत्रे स्वकीयं शोधपत्रं वाचितम्। अस्य सत्रस्य संयोजकः प्रो.हरिदत्तशर्म– महोदयः आसीत्। सायंकाले सांस्कृतिककार्यक्रमे शिवोऽहमिति शास्त्रीयसंगीतस्य प्रस्तुतिः सम्पन्ना जाता। एवं च अन्यदिवसेऽपि सांस्कतिककार्यक्रमे दक्षिणापथसंगीतनृत्यगायनादि विविधाः कार्यक्रमाः आयोजिताः ।

समापनदिवसस्य पूर्वाह्णे बुचनॉन भवनस्य सभागारे शास्त्रीय संगोष्ठी समायोजिता , यस्मिन् अनेके विद्वांसः प्रतिभागं गृहीतवन्तः। ततस्मिन्नेव सभागारे कविसमवायः समायोजितः ,यस्य संयोजकः संचालकः प्रो.हरिदत्तशर्ममहाभागः आसीत् ।कविसमवायस्य अध्यक्षः प्रो.मुरलीमनोहरपाठकः आसीत्। कविसम्मेलनस्य शुभारम्भः पुष्पाञ्जा द्वारा स्वकीयेन सरस्वतीवन्दनया समारब्धा। अतः परं नैके वरिष्ठकवयः कनिष्ठकवयः अपि तत्र सभागारे विराजमानाः आसन्। क्रमानुसारेण सर्वे समाकारिताः स्वकीयकाव्यपाठं प्रस्तोतुम्। एतेषु प्रो. कुटुम्बशास्त्रि–अशोकअकलूजकर–डॉ. एस.वी.रंगरामानुजाचार्युलू, प्रो.जॉन ई एम हॉबेन–डॉ.मुरलीमाधवन–डॉ.राजेन्द्र त्रिपाठी 'रसराजः' – डॉ.श्रेयांश द्विवेदी– डॉ.सौम्यजीतडे–डॉ.सौरभ द्विवेदी–प्रो हरिदत्तशर्मा– प्रो.मुरलीमनोहर पाठक' प्रभृतयः अन्येऽपि कवयः स्वकीयं काव्यपाठं प्रस्तुत्य

शेषभागःअष्ठमपुटे

## गंगातटे भजनं कृतवान् कुमारविश्वासः

ऋषिकेश। प्रख्यात कवि व आम आदमी पार्टी नेता कुमार विश्वास त्रिवेणी घाटे गंगा आरती समारोहे भागं गृहीतवान।



अस्मिन्नवसरे गंगा आरती अपि कृतवान। अस्मिन्नवसरे अत्र प्रचलित भजन संध्यायां सःस्वयं कृतवान। श्री गंगा सभा अपि तं सम्मानिंत कृतवान।

कुमारविश्वासः रविवासरस्य संध्यावेलायां ऋषिकेश आगतवान। आरती कृत्वा अत्र गायक विजेन्द्र वर्मा माध्यमेन निर्मित भजनस्य गायनं भवति। कुमारविश्वासोऽपि गायकस्य पार्श्वे उपविश्य ''जय सीया राम, जय जय सीयाराम इति भजनं भजितवान। अस्मिन्नवसरे स उक्तवान यत् ऋषिकेश माँ गंगायाः पावन सानिध्यं असीम शान्ति एवं समाजाय व्यवहारस्य प्रेरणा प्रददाति। अस्मिन्नेव कारणेन् अहं अत्र आगतवान।

## डॉ. श्यामाप्रसादमुखर्जी अखंडताया कृते स्वजीवनम् अर्पितवान्

नवदेहली। डॉ. श्यामाप्रसादमुखर्जी महोदयस्य जयन्ती अवसरे दिल्लीप्रदेश भाजपा अध्यक्ष मनोजतिवारी महोदयस्य अध्यक्षतायां शहीद उद्याने श्रद्धांजलि कार्यक्रमस्य उद्घाटनभवत्। भाजपा नेता व कार्यकर्ता डॉ. मुखर्जी महोदयस्य प्रतिमायां पुष्प माध्यमेन श्रद्धांजलिं दत्तवान। अस्मिन्नवसरे तिवारी उक्तवान यत् स्वतंत्रता अनन्तरं



अखाण्डतायाःकृते डॉ. मुखार्जी स्व जीवनस्य बलिदानं दत्तवान। ते एकस्मिन देशे द्वि विधानं, द्वि प्रधानं एवं द्वि निशानस्य विरोधं कृतवन्तः। भाजपायाः राष्ट्रिय संगठनमंत्री रामलालः उक्तवान यत् डॉ. मुखर्जी देशे राष्ट्रवादस्य विचारधारायाः आधारः स्थापितवान। वयं सर्वे तं मार्गे गत्वा राष्ट्रनिर्माणस्य कार्यं करणीयम्। येषु सर्वं समान अधिकारः प्राप्तं भवेत्। भाजपा नेतारः वृक्षांरोपणं कृत्वा पर्यावरण संरक्षणाय अग्रे आगतवन्तः। अस्मिनवसरे केन्द्रीयराज्यमंत्री विजय गोयल, प्रदेशसंगठनमहामंत्री सिद्धार्थन, सांसद रमेशविधुड़ी, राष्ट्रिय मंत्री आर.पी.सिंह. प्रदेशमहामंत्री कुलजीत सिंह चलह, रविन्द्र गुप्ता एवं नरेन्द्र चावला आसन्।



मुख्यमंत्री श्री शिवराजसिंहचौहान एवं ताषां धर्मपत्नी साधनासिंहेन सह महाकलेश्वर मंदिरे पूजा अर्चनाः कृतवन्तः

## महिलानां विचारेषु स्थितौ च परिवर्तनम् आगतम् - राज्यपाल-श्रीमती आनंदीबेनपटेलः

भोपाल। राज्यपाला श्रीमती आनंदी बेन पटेलः उक्तवती यत् स्व सहायता समूहेन युक्ताः भूत्वा महिलानां विचारेषु परिस्थितिः कार्येषु च परिवर्तनं जागृतिः च आगता। ताः सर्वेषु क्षेत्रेषु अग्रे वर्धयितुम् इच्छन्ति। सम्प्रति महिलानां कृते अग्रे वर्धापनाय सहयोगस्य आवश्यकता अस्ति। महिलानां विकासं च समृद्धिना एव देशस्य विकासं संभवम् अस्ति। राज्यपाला अद्य अत्र राष्ट्रीया कृषिः एवं ग्रामीणं विकासम् अधिकोष- नाबार्ड इत्यस्य सप्तत्रिंशत् तमे स्थापना दिवसे आयोजितं वार्षिकं सम्मेलनं संबोधयन्ती आसीत्। सम्मेलने विविधं मण्डलेभ्यः समागताः पंच शतात् अधिकाः महिला स्व सहायता समूहाः एवं कृषिः उत्पादनं संगठनानां सदस्याःअपि स्वकीयम् अनुभवं राज्यपालाम् अवदत्।

राज्यपाला श्रीमती पटेलः उक्तवती यत् महिला शक्तेः भण्डारः अस्ति। अस्याः शक्तेः देशस्य हिते उपयोगं भवेत्। सा उक्तवती यत् महिलाः पूर्वे परिवारस्य कल्याणं करणेन सह स्वकीयं विकासं च समृद्धेः अपि ध्यानं स्थापयेयुः। महिलाः स्वकीयं सम्मानं च स्वाभिमानाय परिश्रमं कुर्युः। प्रशिक्षणं प्राप्नुयुः च केन्द्रं च राज्यं शासनेन व्यवसायस्य कृते उपलब्धं क्रियमाणम् अधिकोषः ऋणस्य पर्याप्तं लाभं प्राप्नुयुः।

राज्यपाला अवदत् यत् माता पित्रौः जागरूकतायाः एव परिणामः अस्ति यत् अद्य पुर्त्याः शिक्षायां प्रथमं स्थानं प्राप्य उच्च पदे भूत्वा देशस्य सेवा कुर्वन्ति। सा समारोहे उपस्थिताः जनैः बालानां बाल विवाहं नैव करणाय संकल्पिताः भवितुम् आग्रहं कृतवती। सांसदः श्री आलोक संजरः उक्तवान् यत् गाँधी जी ग्रामाणां प्रगतेः यः स्वप्नः अपश्यत् सः अद्य प्रधानमंत्री श्री नरेन्द्र मोद्याः नेतृत्वे पूर्णः भवति। अद्य समाजे महिलाः पुरुषैः सह स्कन्धेन सह स्कन्धं मेलित्वा प्रति क्षेत्रे कार्यरताः सन्ति। सः उक्तवान् यत् नारी सम्मानं, ममता लज्जायाः च मूर्तयः भवति। नारी सम्मानाय शासनं कठोरम् अनुशासनात्मकं क्रियान्वयनं करणीयम्। अस्मिन् अवसरे नाबार्ड इत्यस्य क्षेत्रीयः मुख्यः महा प्रबंधकः श्री एस.के. बंसलः नाबार्ड इत्यस्य गतिविधिसु प्रकाशं कृतवान्। राज्यपाला महिला स्व सहायता समूहेन निर्मिताः उत्पादाः च सामग्रयाः अवलोकनम् अपि कृतवती। समारोहे कृषिः उत्पादनम् आयुक्तः श्री पी.सी. मीणा, भारतीयं रिजर्व बैंक क्षेत्रीयः निदेशकः श्री पी.के. जेना, भारतीयं स्टेट बैंक उप महाप्रबंधकः श्री एस.के. शुक्ला च बहु संख्यायां स्व सहायता समूहः योजनायाः लाभार्थिणः च गणमान्याः नागरिकाः उपस्थिताः आसन्।

# राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्,
गुणवत्ताप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्)

56-57, संस्थागतक्षेत्रम्, जनकपुरी, नवदेहली -110 058

### विशिष्टसंस्कृतसेवाव्रतीसम्मानप्रदानाय नामनिर्देशनार्थं आमन्त्रणसूचना

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षं "**विशिष्टसंस्कृतसेवाव्रतीसम्मानः**" तादृशविद्वद्भ्यः प्रदीयते ये संस्कृतक्षेत्रेतराः भूत्वापि पारम्परिकष्ठास्त्राणां गभीरानुशीलनेन शोधमौलिकसाहित्यसर्जनेन तथा संस्कृतसम्बद्धकलानैपुण्येन च पारम्परिकशास्त्रेषु संस्कृतानुसन्धानाध्ययनक्षेत्रेजु महत्त्वपूर्णं योगदानं विदधनाः संस्कृताय दत्तजीवनाः वेविद्यन्ते।

प्रतिवर्षं संस्कृतसप्ताहोत्सवस्य मुख्यसमारोहे (श्रावणीपूर्णिमायाम्) अधिकाधिकं त्रिभ्यः विद्वद्भ्यः पष्ठथक्-पृथक् प्रशस्तिपत्रेण सह एकलक्षपरिमितधनराशिः सेवाव्रतीसम्मानरूपेण प्रदीयते। अस्मिन् वर्षे संस्कृतसप्ताहोत्सवः 24 तः 29 अगस्त, 2018 पर्यन्तम् आयोजयिष्यते। तदर्थं भारतदेशस्य सर्वेषां विश्वविद्यालयानां कुलपतयः तथा संस्कृतविभागप्रमुखाः प्रार्थ्यन्ते यत् संस्कृतक्षेत्रेतराः भूत्वा अपि संस्कृतार्थं विशिष्टं योगदानं विदधानानां विदुषां नामानि तेषां पूर्णविवरणेन (सप्रमाणम्) सह 06.08.2018 (5.00 वादनं) पर्यन्तं संस्थानं प्रति पोस्टल द्वारा अथवा निम्नलिखितं ई-मेल संकेतं प्रति प्रेषयितुं शक्नुवन्ति-

**Email:- rskspvc@yahoo.com**

06 जुलाई, 2018 दिनाङ्कात् पश्चात् प्राप्तानि नामानि सेवाव्रतीसम्मानार्थं नैव परिगण्येरन्।

-कुलसचिवः

# 'वैंकुवरनगरे'



डॉ. राजेन्द्रत्रिपाठी 'रसराजः'
अध्यक्ष - संस्कृत-विभाग
इलाहाबाद डिग्री कॉलेज,
इलाहाबाद विश्विद्यालय, इलाहाबाद

विदेशे वैंकुवर नगरे विश्वसम्मेलनं जातम् ।
कनाडादेशपरिलसितः तत्र रात्रौ दिनं भातम् ।1।

इलाहाबादतः दिल्लीं रेलयानेन गत्वाहम्।
ततो हाँकॉगतः अग्रे वायुयानेन संयातम्। 2।

ब्रिटिशकोलम्बिया नाम्न विश्वविद्यालयं दृष्ट्वा।
निवासे पाण्डरोसायां प्राङ्गणं विश्वविख्यातम् ।3।

सुरम्ये भव्यतमभवने शोधपत्राणि पठ्यन्ते।
सभागारेषु सङ्गीतं समस्तं दर्शनं प्राप्तम् ।4।

दिवारात्रौ जगति किमिदं सूर्यदेवो सदा दृष्टः।
प्रभाते सांध्यबेलायां तत्र परिवर्तनं ज्ञातम् ।5।

प्रकृत्या पूर्णपरिसरभू-पाटलोद्यानशालायाम्।
विहाराकर्षणं लब्ध्वा सुन्दरं चित्रणं व्याप्तम्। 6।

समीपे सिन्धुतटसुषमा लोकदृष्टिं मनोहर्त्री।
जले सिकतासने शयनं चित्तसंकर्षणं चाप्तम्। 7

मनोज्ञा नागरी शोभा वाहनं रेलबसयानम्।
जनानां मार्गमनुगमनं नित्यमनुशासनं ध्यातम् ।8

प्रवासं प्राप्य रसराजः रोचते तत्र ऋतुराजः।
विचित्रं पुष्पितं ललितं मधुवनं चास्ति पर्याप्तम्। 9



# उत्तरप्रदेशे संस्कृतविद्यालयानां समस्याः, समाधानोपायाश्च

**डॉ. चन्द्रकान्तदत्तशुक्लः**
असि0 प्रो0 (संस्कृतम्)
राजकीय स्नातकोत्तर महाविद्यालयः
मुहम्मदाबाद– गोहना, मऊ

समस्यापदं व्यापकीभूतमस्ति संस्कृतविद्यालयानां समस्याः प्रायेण सर्वत्र समानाः सन्ति। महच्चिन्ताकरमिदं यत् प्रदेशेषु स्थिताः अकादम्यः, समितयः, परिषदः, संस्थाः यदि संस्कृताय किमपि न कुर्युश्चेदिदं ज्ञातुमपि न शक्यते यत्तद्राज्ये संस्कृतमस्ति। तथापि उत्तरप्रदेशे स्थितानां संस्कृतविद्यालयानां विद्वद्भिः, छात्रैः, प्रबन्धकैः, अभिभावकैः, प्रचारकैश्च सह परिचर्चा– साक्षात्कार–भ्रमणादिभिर्वा याः परिस्थितयः समस्याः दृष्टाः अनुभूताश्चात्र उपास्थाप्यन्ते मया। गणनादृष्ट्या पश्यामश्चेत् उत्तरप्रदेशे पारम्परिकाः 1000 माध्यमिक– विद्यालयाः, 70 वेदपाठशालाः, 450 महाविद्यालयाः, 01 विश्वविद्यालयः, ज्योतिष–वास्तु–संस्कार–संस्कृतप्रचार–प्रकाशन– प्रभृतिविविधान् पक्षान् आश्रित्य कार्यदृष्ट्या सहस्राधिकाः संस्थाः, समितयः, परिषदः विद्यन्ते। एतदनन्तरम् आधुनिकविश्वविद्यालय– महाविद्यालय– विद्यालयेषु संस्कृतविभागाः पृथगेव। वस्तुतः संस्कृतक्षेत्रे यत्र यत्र संस्कृतं तत्र तत्र समस्यापदं सार्थकतां भजते तथाप्यत्र उत्तरप्रदेशे पारम्परिक–संस्कृतविद्यालयानां पुरतः प्रमुखतया ज्वलन्तरूपेण याः समस्याः संस्कृतविकासं परिभवन्ति, अत्रोपस्थाप्यन्ते–

समस्याः–

• आधुनिकशिक्षणकेन्द्रवत् विस्तृतक्षेत्रे प्रचुरसंख्याकेषु कक्षेषु व्यवस्थितस्थानेषु कार्यक्षमप्रबन्धतन्त्रवन्नियन्त्रणाभावो विद्यते।

• संस्कृतविद्यालयाः अपवादं विहाय मठ–मन्दिर–आश्रमादिषु जीर्ण–शीर्णभवनेषु विद्यालयीय मानकीभूत सुविधारहितेषु स्वल्पकक्षेषु पूर्णतया उदासीन– प्रबन्धतन्त्रनियन्त्रिताः दृश्यन्ते।

•विद्यालयेषु योग्यशिक्षकाणां नियुक्तिः, अत्यन्तप्राचीनपाठ्यक्रमः, रोजगारपरक– पाठ्यक्रमः, शिक्षायां नवाचारपरियोजना, छात्राणां सर्वांगीणविकासाय छात्रावास– पुस्तकालय– क्रीडांगण– अनुदानादीनामभावः प्रबन्धकानां, शिक्षकाणां संस्कृतविषयिणी योजनाभावो दरीदृश्यते।

•आधुनिकशिक्षणसंस्थाः व्यवसायवद् सन्ति, अतः तत्र प्रतिस्पर्धा अस्ति, संस्कृतविद्यालयाः धर्मप्रधानाः अध्यात्मप्रधानाश्च सन्तः तद्रहिताः नैराश्यग्रस्ताश्च दृश्यन्ते।

•प्रबन्धतन्त्रदृष्ट्या संस्कृतविद्यालयाः आयवर्धने पूर्णतया असमर्थाः सन्तः केवलं व्ययभारं वर्धयन्ति।

•शासनपक्षतोऽपि आधुनिकविद्यालयवत् सर्वकारीयं ध्यानं संस्कृतविद्यालयेषु नास्ति।

•मठ–मन्दिर–आश्रमातिरिक्ताः ग्रामीणाः वा संस्कृतविद्यालयाः शिक्षणव्यवस्थायां विलपन्तो दृष्यन्ते।

•मठ–मन्दिर–आश्रमादिष्वपि सन्तमहात्मनां पारस्परिकसंघर्षात् भोगोन्मुखप्रवृत्ति –प्राधान्यात् तदधीनाः विद्यालयाः केवलं जीवन्ति।

•समाजोऽपि केवलं नामकरण–विवाह–मुहूर्तादिकं ज्ञातुं, कर्मकाण्डादिकम् आयोजयितुं च संस्कृतविद्यालयम् अन्विषति।

•संस्कृतविद्यालयाः निर्धनानां ब्राह्मणानां, पाण्डित्यवृत्तिवतां, धर्मकर्मशिक्षायाश्च कष्टे विद्यते, इति समाजस्य चिन्तनं भवति।

•संस्कृताध्ययनानन्तरं समुचित–उद्योगप्राप्त्यभावात् समाजः उदासीनः तिष्ठति।

•अध्यापकानां मनसि सततम् आधुनिकचाकचिक्योपलब्धिलालसा, येनकेनप्रचुर अर्थार्जनस्पृहा, शास्त्राध्ययनाध्यापनादिकं प्रत्यरुचिः, हृदि संस्कृतसेवा– परायणताया अभावः विद्यमानोऽस्ति।

•संस्कृतं जानन्तोऽपि संस्कृतसमाजे छात्रैश्च अध्यापकाः संस्कृतं न भाषन्ते, ये न जानन्ति तेषां सम्भाषणस्य अध्यापनस्य च का कथा?

•आवर्षं न कश्चित् प्रेरणादायकः, सर्जनात्मकः कार्यक्रमः, न च सांस्कृतिकोत्सवः, न च वार्षिकोत्सवः क्रीडादिसमारोहश्च। क्वचिदपवादोऽपि भवितुं शक्नोति परं न तदलम्।

•आश्रमस्थान् परम्पराप्राप्तछात्रान् विहाय छात्राणां मानसिकता येन केन प्रमाणपत्र–प्रापणमेवोद्देश्यं भवति।

•विद्यालयवत् विश्वविद्यालयोऽपि न तथा किमपि उद्देश्यप्राप्तिजनकं कार्यं करोति, आयोजयति वा, गुणवत्तापरकं शोधकार्यं विहाय कथमपि परीक्षासंचालनं प्रमुखमस्ति।

•शासनपक्षतः अन्यसक्षमाधिकारि पक्षतो वा कदापि निरीक्षणादिकं नैव क्रियते।

•अध्यापकानां यथासमयप्रशिक्षणाय भावियोजना–साधनाय च न काचिद् योजना परिलक्षिता भवति।

एवम्भूतैः नैकसमस्याभिः उत्तरप्रदेशीयसंस्कृतविद्यालयाः पूर्णतया समस्याग्रस्ताः पीडिताः, उपेक्षिताश्च दृष्यन्ते। सन्ति केचन् विद्यालयाः संस्कृतसंस्कृतिसंरक्षणपरायणाः, केचन् शास्त्रसंरक्षणमेव जीवनम् इति मत्वा संस्कृतजीविनो विद्वांसः छात्रा अपि, परन्त्विदमत्यल्पम् अपवादमात्रमेव। यद्यपि उपरि प्रस्तुतासु समस्यासु बह्वयस्तु अस्माकं संस्कृतज्ञानाम् अनवधानात् अकर्मण्यात् विद्यन्ते। किं वयं तथा किमपि कर्तुं न शक्नुमः यदिमाः समस्याः असमस्याः भवेयुः? सर्वकारः, समाजः अस्मान् अनुकुर्युः? नूनमेव शक्नुमः, अतोऽत्र केचन् समाधानोपायाः परामर्शाश्चोपस्थाप्यन्ते विचार्यन्ते–

वैयक्तिकम्–

•सर्वप्रथमं यथा स्थितिः परिस्थितिर्वा अस्ति तस्यामेव वार्षिकम् उद्देश्यं योजनां वा निर्मीय, तत्प्राप्तये च सक्रियताम् आनयेम क्रियाशीलताम् आचराम।

•'तथायुक्तं चानीप्सितम्' इति पाणिनिसूत्रानुसारं स्व स्व कार्यं कुर्वन्तः अनीक्षितमपि संस्कृतस्योपेक्षावारणरूपकर्म, कुर्याम। यथा कर्मकाण्डं कुर्वन्, प्रवचनं कुर्वन् तत्रस्थान् जनान् बालकान् वा संस्कृताय प्रेरणम्।

•बहवो अस्माकं बन्धवः, मित्राणि, आदरणीयाः संस्कृतक्षेत्रे निःस्वार्थभावेन संस्कृतसेवाप्रतिनः सन्ति, आवश्यकता अस्ति तेन सह छात्राणां प्रेरणायाः।

•दिनानुदिनम् संस्कृताध्येतृणां छात्राणां संख्यादृष्ट्या न्यूनता चिन्ताकरी विद्यते, एतदर्थं संस्कृतोपयोगितायाः प्रचार–प्रसारः आवश्यकः, तदर्थं स्वयं प्रचारकाः भवेम।

•यतः संस्कृतं सम्बद्धम् अस्ति तत्तद् स्थानेषु कार्यालयेषु सम्पर्कः आवश्यकः।

•प्रतिभासम्पन्नछात्राणाम् उत्तरोत्तरविकासाय, स्वस्य सामर्थ्यानुसारं तेषां समुचित– अवसराय प्रयत्नाः अस्माभिर्विधेयाः।

•संस्कृतम् आवश्यकम्' इति मानसिकतावतां विविधजनसमूहानां संघटनं भवेत्, तथाविधः क्रियाकलापो आवश्यकः। अनेन संस्कृतस्य समर्थकाः (पैरवीकाराः) वर्धिष्यन्ते यस्य महती आवश्यकता अस्ति।

•संस्कृतस्य जनस्वीकार्यता कथं भवेत्' इति विचिन्त्य स्व स्वकर्मणा तथा आचरणीयम्।

•संस्कृतं संस्कृतेन, संस्कृतसमाजे संस्कृतसम्भाषणं, प्रमुखतया भवेत्।

•संस्कृतकवीनां जयन्तिः, पर्व–त्योहाराणाम् सामाजिकोत्सवः यथा सामर्थ्यम् आयोजनीयः।

•अस्माभिः सर्वैरपि न्यूनातिन्यूनम् एकं संस्कृतपत्रं पत्रिकां वा अवश्यमेव क्रयणीयम्।

सांस्थानिकम्–

•विद्यालये संस्थाप्रमुखाणां प्रबन्धकादीनां महत्वपूर्णा भूमिका अस्ति। ते येन केन वैयक्तिकं सामाजिकं सर्वकारीयादिकं सहयोगं प्राप्य आधुनिकविद्यालयवत् स्वरूपम् प्रदातुं परिकल्पयेयुः।

•उदासीनतां विहाय अध्यापकानां, छात्राणाम्, अभिभावकानां वार्षिकं सम्मेलनं करणीयम्, एतेषाम् स्नेहेन अनुशासनेन शिक्षणव्यवस्थायाः उच्चीकरणम्।

•संस्थाप्रमुखैः वर्षे न्यूनातिन्यूनम् एकबारं नूनमेव समाजप्रमुखाणां, प्रशासकानां, विशेषप्रतिभासम्पन्ननानां जनानां विद्यालये आह्वानं करणीयम्।

•संस्थाप्रमुखैः आमजनमध्ये संस्थोपलब्धिप्रबोधनाय वीथीनाटक– शोभायात्रा– शास्त्रार्थ– संस्कृतिक– शास्त्रीयकौशलप्रदर्शनादि विविधकार्यक्रमाः करणीयाः।

•वर्षे न्यूनातिन्यूनम् एकबारं क्रीडा, सामूहिकं भ्रमणं, विविधक्षेत्राणां ज्ञानवृद्धानां वयोवृद्धानां सम्बोधनादि कार्यक्रमा आयोजनीयाः।

•छात्रावास–पुस्तकालय–क्रीडांगणादीनां कष्टे यावच्छक्यं जनसहभागिता स्वीकरणीया।

•संस्कृतेन सह आधुनिकशिक्षायाः महती आवश्यकता अस्ति, संगणक–चित्रकारिता– वाद्यादीनां शिक्षणं स्वरोजगाराय सार्थकमस्ति, अतः शिक्षणव्यवस्था करणीया।

•छात्राणां नवरोजगाराय परामर्श (Counseling) कार्यक्रमः प्रतिवर्षम् आयेजनीयः।

•सम्प्रति महाविद्यालयेषु नियुक्तिः प्रचलति, प्रक्रिया स्वार्थसेवकानाम् अवसरानुगुणमस्ति, तत्र गुणवत्तायाः प्रतिभासम्पन्नतायाश्च ध्यानं देयमस्ति, अन्यथा शिक्षकस्थानपूरितेऽपि पूर्ववदेव अभावस्य रोदनं करणीयं भविष्यति।

शासनिकम्–

•शासनेन भारतस्य प्राणभूतायाः राष्ट्रमेकस्मिन् सूत्रे कर्तुं प्रधानभूतायाः संस्कृतभाषायाः विशेषेण ध्यानम् आवश्यकम् अस्ति।

•शासनस्य संस्कृतं प्रत्युदासीनतायाः त्यागः आवश्यकः अस्ति।

•प्राथमिकस्तरादेव हिन्दी–आंग्लपद्वति विद्यालयवत् संस्कृतपद्धतिविद्यालयाः समुद्घाटनीयाः।

•मध्यमिककक्षापर्यन्तं संस्कृतमनिवार्यम् भवेत्।

•संस्कृताध्येतृणां प्रतिभासम्पन्नानां पलायनम्, उदासीनता न स्यादतः समयेन समुचिता उद्योगव्यवस्था शासनेन चिन्तनीया।

•विद्यालयेषु महाविद्यालयेषु विश्वविद्यालये च यथाशीघ्रं योग्यानां क्रियाशीलानां संस्कृत शिक्षकाणां नियुक्तिः करणीया।

•शासनेन संस्कृताध्येतृणां पर्यटन– पर्यावरण– पुरातत्व– वित्त–रक्षा–आयुर्वेद–योग मौसमविभागादिषु रोजगारक्षेत्रस्य विस्तारेण उद्योगावसरं प्रदेयम्। तत्र तत्र अभूतपूर्वं परिवर्तनं प्राप्तुं शक्यते।

•संस्कृतस्य प्रचार–प्रसाराय संस्कृतप्रेरकाणां नियुक्तिः अत्यवश्यकी प्रतिभाति, अतः संस्कृतप्रेरक नियुक्तिः भवेत् ।

•यथावसरम् असामयिकं संस्कृतशिक्षणसंस्थानां निरीक्षणमप्यावश्यकमतः तदपि भवेत्।

•शासनस्तरे प्रदेशस्य सर्वेषु मण्डलेषु एकैकं छात्रावास– पुस्तकालय– क्रीडांगण– संगणक– अन्तर्जालादि आधुनिकसुविधासहितः आदर्शविद्यालयः, महाविद्यालयः संस्थापितो भवेत्।

•सर्वशिक्षाभियानान्तर्गतलाभाः संस्कृतविद्यालयाः अपि प्राप्नुयुः।

•शासनेन संस्कृतविद्यालयेभ्योऽपि अनुदानं प्रदातव्यम्, विविधपुरस्कारांश्च वर्धनीयाः।

धार्मिकम्–

• मठ–मन्दिर–आश्रमादिकं विहाय संस्कृतस्य समुन्नतिचिन्तनं मृगमरीचिकावदेवास्ति। आरम्भकालादेव अत्रैव संस्कृतं संरक्षितमस्ति, न केवलं संस्कृतम् अपितु भारतीय–सनातनसंस्कृतिः, संस्काराः अत्रैव पुष्यन्ति दीव्यन्ति च।

•सन्त–महात्मानो धर्माचार्याः प्रमुखकर्मत्वेन संस्कृतं स्वीकुर्युः, आधुनिकशिक्षणसंस्थान–

सदृशाः संस्थाः, यथा ते स्वयं संचालयन्ति तथा संस्कृताय अभिनवं स्वरूपं दद्युः।

• धर्माचार्याणां संस्कृतेन सह अन्योन्याश्रयसम्बन्धोऽस्ति। अतस्तैः निष्कारणधर्मत्वेन संस्कृतस्योन्नयने आधुनिकैः सह स्पर्धायै संकल्पयुतैर्भाव्यम्। भवन्तः सन्ति समर्थशालिनः। भवन्त एव संस्कृतसाधकानां संकल्पसाधकाः।

• सन्तमहात्मानः आरम्भत एव संस्कृतं संस्कृतज्ञांश्च परितुष्यन्ति, अतः संस्कृताय कार्यकर्तृकेभ्यः प्रचारकेभ्यः विद्वद्भ्यः पुरस्काराः सम्मानाश्च तैरपि प्रदेयाः।

•योगी–सन्त–धर्माचार्यैः संस्कृतज्ञेभ्यः आजीविका चिन्तनीया, स्वनिर्देशने योजनीयाश्च।

समूहिकम्–

•राष्ट्रस्तरीयं, प्रदेशस्तरीयं सुविस्तृतम् आधुनिकोपकरणैः सुसज्जितं सुव्यवस्थितमेकं 'संस्कृतशोधसंस्थानम्' नितान्तम् आवश्यकम्, तदर्थम् अस्माभिः सर्वैः संस्कृतसाधकैः प्रयत्नशीलैर्भाव्यम्।

•संस्कृतं सम्यक्तया प्रसारयितुं राष्ट्रस्तरीयः प्रदेशस्तरीयः 'संस्कृतशिक्षा आयोगः' स्यात्।

•अध्ययनाध्यापनं, परीक्षाप्रणाली च कथं संस्कृतमयं भवेत् तथाविधः प्रयासः करणीयः।

•संस्कृतक्षेत्रे शोधस्तरः निम्नस्तरः, तत्र शोधक्षेत्रं विस्तृतम् अभिनवं च भवेत्।

•अन्तर्विद्यालयीयं जनपद–प्रदेश–राष्ट्रस्तरीयं भारतीयवैभवबोधक– स्पर्धा, प्रदर्शनी, कार्यशाला, गोष्ठी, सम्मेलनादिकम् आयोजनीयम्।

•सामान्यजनलाभाय नाटक–चलचित्र–गीत–सूक्ति–मन्त्र–भाषाशिक्षण– शास्त्रशिक्षणा दीनाम् आधुनिकयन्त्रोपयोगेन ध्वनि–चित्रमुद्रिकादीनां (सीडी) निर्माणं करणीयम्।

•संस्कृतज्ञानां, प्रतिभावतां प्रोत्साहनाय सहयोगाय सरलहृदयाः भवेम।

•सर्वेषु संस्कृतशिक्षणसंस्थानेषु नियतरूपेण संस्कृतपत्र–पत्रिकाः नूनमेव आगच्छेयुः।

•एवं भूतं सर्वजनसमादरयुतं 'जनपद–प्रदेश–राष्ट्रिय स्तरे संस्कृतसम्मेलनम्' भव्यतां दिव्यताम् आप्नुयात् प्रतिवर्षं भवेत्।

अमरवाणी विजयताम्।

लेखस्रोतः–

संस्कृतायोग 1956–57, प्रतिवेदनम्, गाण्डीवम्,
सम्भाषणसन्देशादिपत्रिकाः, विविधसंगोष्ठी, परिचर्चा,
आन्तर्जालीयब्लाग, भ्रमणादिः।
(भारतीयभाषामंचद्वारा आयोजिते नवदेहल्यां
राष्टिसंस्कृतसम्मेलने (25.26 / 11 / 17)प्रस्तुतमिदं पत्रम्)

# सम्पादकीयम्

मान्याः!

असतो मा सद् गमय, तमसो मा ज्योतिर्गमय, मृत्योर्माऽमृतं गमय इति दिव्यो घोषो भारतवर्ष एव श्रूयते। अयं वैदिको मन्त्रः नैव केवलं प्रार्थनामन्त्रो वर्तते अपितु सूक्ष्मपरिशीलनेन परिज्ञायते यदयं मानवान् शिक्षयति यत् असत्यं मा वद, तमो हित्वाज्ञानं त्यक्त्वेति ज्ञानप्रकाशं प्राप्नुहि, जननमरणचक्रान्मुक्तो भवेति। मन्त्रद्रष्टारस्ते वन्द्या ये मानवजीवनमार्गं मन्त्रालोकनेन प्रकाशयन्ति। अस्माकं मानवानामेतत् कर्तव्यमस्ति यत्कथं स्वजीवनं यापनीयम्। दिव्या अमरवाणी या संस्कृतमिति नाम्ना लोके गीयते तस्यां कश्चन दिव्यः प्रभावो वर्तते, येन त्रिविधसन्तापो दूरीभवति। किन्तु संस्कृतं हित्वा वैदिशिकीं भाषां भाषमाणा भारतीयाः संस्कृतं प्रति निरुत्साहिनो वर्तन्त इति नैव वक्तुं पार्यते। देशे समायोज्यमानसंस्कृतसम्मेलनं संस्कृतेतरजनानामपि समागतः संस्कृतानुरागिणां हृदि आनन्दं जनयति। भारतमेव नापितु विदेशेष्वपि संस्कृतं सादरं पाठ्यते यथासमयं विशालं सम्मेलनं चायोज्यते अनेन संस्कष्तविश्वव्यापकता दष्गोचरीभवत्येवेति नास्ति संशयः।

सद्य एव जुलाईमासेऽस्मिन् कनाडादेशस्य वैंकुवरनगरे सप्तदशविश्वसंस्कष्तसम्मेलनं समायोजितम्, यत्र भारतस्य सम्मान्याः विद्वांसः कवयः शोधपत्रवाचकाश्च भागमगृह्णन्। अनेकदेशेभ्यः आगता संस्कृतप्राध्यापकाः संस्कृतज्ञाः संसाराय सन्देशमश्रावयन् यत् संस्कृतं बहुमूल्योनिधिरस्ति।

सुहृदः! सत्यमेवास्माभिः नवजागरणं करणीयं येन भारतीया धरा भाषतां संस्कृतं

भारतीयं वियद् भाषतां संस्कृतम्।

अन्ते अमरवाणी विजयतां ब्रुवाणा स्ववाणीं समाप्नोमि।

## वेदामृतम्

**( ऋग्वेदभाष्यम् )**

( प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः )

**घृताहवन दीदिवः प्रति ष्म रिषतो दह।**
**अग्ने त्वं रक्षस्विनः॥५॥**

अर्थ-जो अग्नि इस प्रकार सुगन्ध्यादि गुणवाले पदार्थों से संयुक्त होकर सब दुर्गन्ध आदि दोषों को निवारण करके सब के लिये सुखदायक होता है, वह अच्छे प्रकार काम में लाना चाहिए। ईश्वर का यह वचन सब मनुष्यों को मानना उचित है ॥५॥

वह अग्नि कैसे प्रकाशित होता और किस प्रकार का है, तो अगले मन्त्र में उपदेश किया है-

**अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा।**
**हव्यवाड् जुह्वास्यः॥६॥**

अर्थ-जो यह सब पदार्थों में मिला हुआ विद्युरूप अग्नि कहाता है, उसी से प्रत्यक्ष यह सूर्यलोक और भौतिक अग्नि प्रकाशित होते हैं और फिर जिसमें ये छिपे हुए विद्युरूप होके रहते हैं, जो इनके गुण और विद्या को ग्रहण करके मनुष्य लोग उपकार करें, तो उनसे अनेक व्यवहार सिद्ध होकर उनको अत्यन्त आनन्द की प्राप्ति होती है, यह जगदीश्वर का वचन है॥६॥

अगले मन्त्र में अग्नि शब्द से ईश्वर का उपदेश किया है

**कविमग्निमुपस्तुहि सत्यधर्माणमध्वरे।**
**देवममीवचातनम् ॥७॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। मनुष्यों को सत्यविद्या से धर्म की प्राप्ति तथा शिल्पविद्या की सिद्धि के लिए ईश्वर और भौतिक अग्नि के गुण अलग-अलग प्रकाशित करने चाहिएँ जिससे प्राणियों को रोग आदि के विनाशपूर्वक सब सुखों की प्राप्ति यथावत् हो ॥७॥

फिर भी अगले मन्त्र में ईश्वर का उपदेश किया है

**यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति।**
**तस्य स्म प्राविता भव॥८॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। दूत शब्द का अर्थ दो पक्ष में समझना चाहिए, अर्थात् एक इस प्रकार से कि सब मनुष्यों में ज्ञान का पहुँचाना ईश्वर पक्ष, तथा एक से दूसरे देश में पदार्थों का पहुँचाना भौतिक पक्ष में ग्रहण किया गया है। जो आस्तिक, अर्थात् परमेश्वर में विश्वास रखनेवाले मनुष्य अपने हृदय में सर्वसाक्षी का ध्यान करते हैं, वे पुरुष ईश्वर से रक्षा को प्राप्त होकर पापों से बचकर धर्मात्मा हुए अत्यन्त सुख को प्राप्त होते हैं, तथा जो युक्त से विमान आदि रथों में भौतिक अग्नि से संयुक्त करते हैं, वे भी युद्धादिकों में रक्षा को प्राप्त हो होकर औरों की रक्षा करनेवाले होते हैं ॥८॥

# स्वातन्त्र्योत्तरार्वाचीनसंस्कृतकाव्यानुशीलनम्

-डॉ.राजेन्द्रत्रिपाठी 'रसराजः'

स्वातन्त्र्योत्तरार्वाचीनसंस्कृतकाव्ये एकतो यावत् पारम्परिककाव्यमनुश्रित्य महाकाव्यखण्डकाव्यनाट्यकथासाहित्यप्रभृति ग्रन्था विलिख्यन्ते । अन्यतस्तावत् अभिनवलोकगीतपरम्परामवलम्ब्य विविधविधासु लयतालरागरागिणीमाधृत्य संगीतस्वरसम्मिश्रितगीतगलज्जलिकादि- लोकगीतानां प्रयोगा अपि सहृदयैः समाद्रियन्ते। न केवलमेतदपितु छन्दोबन्धाः,गीतबन्धाः, मुक्तच्छन्दोबन्धाः, अनूदितबन्धाः, बालगीतिबन्धाः हाइकु- सिजो- तान्का- कवितादयः मुक्तशैल्यां नूतनप्रगतिशीलरचनानुसारेण संस्कृतकाव्येष्वपि दृश्यन्ते प्रयुज्यन्ते च।

साम्प्रतिकसमये विश्वेऽस्मिन् घटमाना घटनाः सूक्ष्मेक्षिकया



कविवर्यैः यथार्थरूपेण यथैव दृश्यन्ते तथैव स्वकीये काव्येऽपि प्रस्तूयन्ते।

वर्तमानसन्दर्भे वैश्विकसमस्यासु पर्यावरणं-आतङ्कवादः- भ्रष्टाचारः- सामाजिक-सांस्कृतिक-राजनैतिक-परिवर्तन- धनोपार्जन- मानवाधिकारसंरक्षणमित्यनेके विषयाः सामान्यतया मन्यन्ते। संस्कृतकवयः एतेषु विषयेषु स्वीयकवितामाध्यमेन न केवलं विषयमुद्घाटयन्तिअपितु जनजागरणाय लोकानाह्वयन्ति, प्रेरयन्ति च।

अर्वाचीनसंस्कृतकाव्ये वैश्विकवृत्तान्तमभिलक्ष्य प्रवासिनः कवयः कदाचिद् वैदेशिकयात्रायाः वृत्तानि स्वकीये काव्ये समुपस्थापयन्ति। कदाचिद् अमेरिका-जर्मनी-स्विसदेशस्य प्रकृतिं प्रदर्शयन्ति। एवञ्च क्वचिद् थाईदेशविलासं- रशियाशतकम्-विमानशतकम्- बालीप्रत्यभिज्ञानशतकम्-भातिमौरीशस्- थाई भूमिरियम्- सनाम्लुआङ्भिधानमिति विषयानधिकृत्य विविधानि वृत्तानि वर्ण्यन्ति।

वर्तमान् वैश्विक्सन्दर्भे आतङ्कवादविभीषिकामवलम्ब्य बहूनि गीतानि विलिख्यन्ते। पर्यावरणसंरक्षणं-वैश्विकसुख-शान्ति- सद्भावनां-एकतामखण्डतामवधार्य काव्यलेखनानि जायन्ते।

अस्माकं देशे सम्प्रति स्वच्छभारतं-पर्यावरणसंरक्षणं- निर्मलगङ्गा- गोरक्षण-योगक्रिया-नारीसंरक्षणं-सुतासंरक्षणम् भ्रूणहत्यानिवारण-आतङ्कवाद- भ्रष्टाचार- व्यभिचार-अपहरण- लुण्ठनोत्कोचादि विषयिणी महती चिन्ता संजायते। एतासां सर्वासां समाधानाय कविवर्यैरपि संवेदनया काव्यान्यपि लिख्यन्ते। आधुनिकसंस्कृतकवयः एतेषु विषयेष्वपि विविधविधायां गीतानि विरचय्य लोकसंवेदनामुद्घोषयन्ति।

राष्ट्रियैकतासुखशान्तिसुरक्षायाः गीतानि गायं गायं कवयः समाजिकसद्भावनां वर्धयन्ति। राजनीतौ व्याप्तभ्रष्टाचारमप्युद्घाट्य जनजागरणं कुर्वन्ति कारयन्ति च।

साम्प्रतिकसमाजे राजपथमध्ये चापणे सार्वजनिकचतुष्पथेष्वपि हिंसा-बलात्कारापहरण-लुण्ठनादिव्यापारमुद्दिश्य काव्येषु निन्दां भर्त्सनां च प्रकटयन्ति।

कदाचिद् सैन्यबलैः सम्पादितं सर्जिकलस्ट्राइक नाम वीरोचितपौरुषमपि प्रशंसन्ति। काव्यकर्मणि संलग्नाः सुकवयः यदि कुत्रापि सुघटना-दुर्घटना सञ्जायते तर्हि तत्कालमेव स्वकीयां प्रतिक्रियां गीत-नवगीत-गजलादि स्वानुकूलविधामाध्यमेन न केवलं लिखन्त्यपितु मञ्चेषु गायन्ति, प्रकाशयन्ति लोकानवबोधयन्ति च।

एवञ्च राष्ट्रियान्ताराष्ट्रियस्तरे समाजे या अपि प्रवृत्तयः कुप्रवृत्तयः विसङ्गतितः सञ्जायन्ते तान् सर्वान् अर्वाचीनसंस्कृतकाव्यदर्पणेन संप्रकाश्य कवयः स्वीयकविधर्मं निर्वाहयितुं पालयितुं च महद्योगदानं व्याहरन्ति यतो हि साहित्यं समाजस्य दर्पणमिति। समाजस्य परिवर्तनेन सह साहित्यमपि नव्यं स्वरूपं दधाति। साम्प्रतिककालः संस्कृतनवगीतविधानां स्वर्णकालः इति मन्यते। एवमवधार्य सुकवयः सम्प्रति सोशलमीडियामाध्यमेनापि काव्यानि रचयन्ति, प्रकाशयन्ति, गायन्ति, मञ्चेषु श्रावयन्ति च। संस्कृतस्य प्रचाराय प्रसाराय च अर्वाचीनकाव्यसंरचनासु ये सुप्रतिष्ठिताः सुकवयः संलग्नाः वर्तन्ते तेषां कृतीनामनुशीलनमेव यथाशक्यं प्रस्तोतुं मया प्रयत्यते इति।

स्वातन्त्र्योत्तरार्वाचीनसंस्कृतसाहित्ये यानि काव्यानि विरचितानि तेषां प्रभावेणैव कालोऽयं संस्कृतसाहित्यस्य समृद्धिकालः इति मन्यते। भारतस्य स्वतन्त्रतासंप्राप्तिमेवावलम्ब्य अद्यपर्यन्तं नैकानि काव्यानि विरचितानि। अर्वाचीनसंस्कृतसाहित्यस्य प्रत्येकविधामनुश्रित्य काव्यानां कर्ता त्रिवेणीकविरूपेणाभिज्ञातोऽभिराजराजेन्द्रमिश्रमहाभागेन विंशशताब्दीग्रन्थसूचीपत्रम् ( 1901-2000 ) प्रकाशितम्। ( Catalogue of the worth Century SANSKRIT WORKS ) - Akshayavata Prakashan, Allahabad.

ग्रन्थेऽस्मिन् पञ्चशतादधिकं द्विसहस्ररचनानां संकलनं समुपलभ्यते।

एते कवयः एकतो यावत् पारम्परिकसाहित्यमवलम्ब्य काव्यानि रचयन्ति, अन्यतो हि ते नायकनायिकयोः प्रतिमानं परिवर्त्य लोकप्रियनेतारमप्यभिलक्ष्य बहूनि महाकाव्यानि संरचयन्ति। यथा- ब्रह्मानन्दशुक्लकृतनेहरूचरितम्,विश्वनाथकेशवछत्रेद्वाराप्रणीतं सुभाषचरितम्, स्वातन्त्र्योदयम् , माधवश्रीहरिअणेविरचितः तिलकयशोऽर्णवः, शिवगोविन्दत्रिपाठिना विरचितं गान्धिगौरवम्, त्र्यम्बकशर्मभण्डारकरस्य महाकाव्यं, विवेकानन्दचरितमिति नैकान् महापुरुषानधिकृत्य विशेषरूपेण प्रसिद्धानि महाकाव्यानि समुपलभ्यन्ते। वैदेशिकमहापुरुषानपि समवलम्ब्य नैकानि महाकाव्यानि प्राप्यन्ते यथा- पद्मशास्त्रिप्रणीतं लेनिनामृतम् , रेवाप्रसादद्विवेदिमहाभागेन विरचितं स्वातन्त्र्यसम्भवम्, शकटारः इति। एवञ्च टाल्सटॉय-मार्टिनलूथरकिंग- लेनिन- कैनेडि- नेल्सनमण्डेला प्रभृतयः वैदेशिकजननायकाः अप्यर्वाचीनसंस्कृतरचनायां संगुम्फिताः वर्तन्ते। न केवलं जननायकाः अपितु पौराणिकनारीचरित्रमपि महाकाव्येषु प्रमुखरूपेण निरूप्यन्ते यथा- अभिराजराजेन्द्रमिश्रप्रणीतं जानकीजीवनम्, रेवाप्रसादद्विवेदिना विरचितं सीताचरितम्, सुबोधचन्द्रपन्तविरचितं झाँसीश्वरीचरितम्, सत्यव्रतशास्त्रिकृतं इन्दिरागान्धीचरितम् , रामकीर्तिकाव्यम्, ओगेटिपरीक्षितशर्मकृतं यशोधरामहाकाव्यम् , श्रीमत्प्रतापराणायनमिति। अन्यान्यपि महाकाव्यानि सन्ति यथा-मेधाव्रताचार्यकृतं दयानन्ददिग्विजयम् , महर्षिविरजानन्दचरितम् , पण्डिताक्षमारावकृतं ज्ञानेश्वरचरितम् , तुकारामचरितम् , स्वराज्यलिजयम् , रामदासचरितम् , स्वामीभगवदाचार्यप्रणीतं महात्मागान्धिचरितम् , पूर्णप्रसादब्राह्मणकृतं सत्यहरिश्चन्द्रमहाकाव्यम् , वी.वेंकटरामशर्मप्रणीतं श्रीरामवर्ममहाराजचरित्रकाव्यम् , जयरामशास्त्रिप्रणीतजवाहरवसन्तसाम्राज्यम् , श्रीपादकृष्णमूर्तिशास्त्रिप्रणीतराजेन्द्रप्रसादाभ्युदयम् , भरतराजघिमिरेणकृतं महेन्द्रोदयमहाकाव्यम् , हरिप्रसादाचार्यकृतगोरक्षशाहवंशमहाकाव्यम् , पशुपतिझाप्रणीतं नेपालसाम्राज्योदयम्, बलभद्रशास्त्रिणा प्रणीतं नेहरूयशः सौरभम् , रघुनाथप्रसादचतुर्वेदीकृतं जवाहरज्योतिर्महाकाव्यम्, वी.राघवनमहाभागेन कृतं मुत्तुस्वामिदीक्षितचरितम् , श्रीधरभास्करवर्णेकरस्य शिवराज्योदयम् , कृष्णप्रसादघिमिरेणकृतं नाचिकेतसम् , श्रीकृष्णचरितामृतम् , गुलाबचन्द्रचूलेट 'पाटलेन्दु ' प्रणीतं कर्णचरितामृतम् , शिवप्रसादभारद्वाजप्रणीतं लौहपुरुषावदानम्, हरिनारायणदीक्षितविरचितं भीष्मचरितम् , कृष्णदत्तशर्मशास्त्रिकृतं शिववीरचरितम् , भगवान् परशुरामः, बलभद्रप्रसादशास्त्रिकृतं इन्दिराजीवनम्, भागीरथीदर्शनम् , जगद्गुरुरामभद्राचार्यविरचितं भार्गवराघवीयम्, माधवभट्टराईकृतं सत्यसाईचरितम् वेणीमाधवढकालकृतं पृथ्वदयमहाकाव्यम् , दण्डिस्वामिनिगमबोधतीर्थकृतं शङ्कराचार्यचरितम् , हरिप्रसादद्विवेदिकृतं गोस्वामितुलसीदासचरितम्, जैनमुनिसागरप्रणीतं वीरोदयम् , सुदर्शनोदयम् , इत्यादयः त्रिशताधिकानि महाकाव्यानि विरचितानि वर्तन्ते।

खण्डकाव्यविधामवलम्ब्य सहस्राद्प्यधिकानि बहूनि रचनानि सञ्जातानि। एतेषु गीतकाव्यम्, दूतकाव्यम्, सन्देशकाव्यम्, स्तोत्रकाव्यम्, नीतिकाव्यम्, अन्यापदेशकाव्यम्, लहरीकाव्यम्, विमानकाव्यमिति रचनानि विलिखितानि सन्ति।

स्वतन्त्रभारतम्- बालकृष्णभट्टकृतम्, सुल्तानचरितम्-

**शेषभागः पंचमपुटे**

**चतुर्थपुटस्य शेषभागः**

छञ्जूरामशास्त्रिणः कृतम्, ग्रामज्योतिः-पण्डिताक्षमारावकृता- जवाहरतरङ्गिणी एवं स्वातन्त्र्यवीरशतकं- संस्कृतगीतमाला- संघगीता-श्रीधरभास्कर वर्णेकरस्य,गीतगङ्गा एवं गीताञ्जलिः- बाबूराम अवस्थीकृताः, विरहलहरी एवं मातृभूलहरी- श्रीभास्करवर्णेकरस्य बृहत्तरभारतम् एवं गुरुगोविन्दसिंहचरितम्, पत्रकाव्यम् - सत्यव्रतशास्त्रिणः, स्मृतिचित्रम्- रहसविहारी द्विवेदिनः, ईशकाव्यम्- सुभाषवेदालंकारस्य,

कापिशायिनी- जगन्नाथपाठकस्य, भाति मे भारतम् एवं जय भारतभूमे - रमाकान्त शुक्लस्य, प्रमथः - रेवाप्रसाद द्विवेदिनः, स्फाटिकीमाला -विष्णुकान्तशुक्लस्य, सुरवाग्विलासम्- दीपक घोषस्य, वाणीशतकम्, उन्मेषः- नलिनीशुक्लायाः, अत्रान्तरे - हर्षदेव माधवस्य, आर्यान्योक्तिशतकम्, नवाष्टमालिका, पराम्बाशतकम्, मृगाङ्कदूतम्, अभिराजसप्तशती,मृद्वीका श्रुतिम्भरा,धर्माचन्दचरितम्, शताब्दीकाव्यम् - अभिराजराजेन्द्रमिश्रस्य,सारस्वतसमुन्मेषः - विन्ध्येश्वरी प्रसाद मिश्रस्य, गीताली- चन्द्रभानुत्रिपाठिनः, नवस्पन्दः, लहरीदशकम्, प्रख्या, आयतिः, -राधावल्लभ त्रिपाठिनः, तरङ्गदूतम् - कृपाराम त्रिपाठिनः, व्यङ्ग्यविलासः - प्रशस्यमित्र शास्त्रिणः वीणा - रामकरणशर्मणः, बालगीताली - हरिदत्तशर्मणः। एवञ्च बहूनि खण्डकाव्यानि अर्वाचीनसंस्कृते लिख्यन्ते च।

अर्वाचीनवैदेशिकसंस्कृतकाव्येषु संस्कृतकवयः पाश्चात्यसंस्कृतिमाश्रित्य स्वकीयासु रचनासु प्रवासकालीनानुभूतिमुपस्थापयन्ति। एतेषु कविषु प्रमुखाः - प्रो.रेवाप्रसाद द्विवेदि- पं.दिगम्बर महापात्र - प्रो.सत्यव्रत शास्त्रि- पद्मशास्त्रि-प्रो.ओम प्रकाश पाण्डेय- डॉ.सुभाष विद्यालङ्कार- प्रो.अभिराज राजेन्द्र मिश्र - प्रो.राधावल्लभ त्रिपाठी- प्रो.हरिदत्त शर्म प्रभृतयः परिगण्यन्ते ।

वैश्विक् काव्यसन्दर्भे भारतीयकवयः वैदिशिकयात्रायां प्रवासे पर्यटने वा यत्र कुतोऽपि गताः तत्रैव स्वीयानुभूतिं गीतेषु, खण्डकाव्येषु, महाकाव्येषु वा विरचयन्ति। तत्र क्वचिद् प्रकृतिसौन्दर्यं पश्यन्ति, क्वचिद् नारीणां उन्मुक्तदेहदर्शनं वर्णयन्ति, क्वच्चित् तेषां सर्वेषां कर्तव्यकौशलं प्रशंसन्ति। स्वाधीनकार्यपद्धतिं प्रवृत्तिं चालोक्य तेषां स्वयंसेवया प्रेरणामपि प्राप्नुवन्ति ?। अत्रागत्य न केवलं लोकानुपदिशन्त्यपितु काव्येषु वर्णनं कृत्वा समाजे राष्ट्रे वा प्रकाशयन्ति। अस्माकं देशे भारतीयसंस्कृतौ प्रेमप्रसंगे याः प्रच्छन्नकामुकता-परस्परदुर्लभता-बहुवार्यमानता- प्रणयभावनायाः प्रीतिकामनायाश्च विशिष्टानि तत्त्वानि कथितानि अथ च एतैरेव प्रेम्णः पराकाराष्ठापि प्रतिपाद्यते,अनुभूयते च। पाश्चात्यसंस्कृतौ एतादृशीपरम्परा नैव दृश्यते। तत्रोन्मुक्तप्रेमप्रदर्शनं-देहदर्शनं- सूक्ष्मातिसूक्ष्मवस्त्रेण शरीराच्छादनं सामान्यजीवनशैलीति मन्यते। आचार्यरेवाप्रसादद्विवेदिमहाभागः स्वकीये 'अमेरिका' इति काव्ये एतादृशीदशायाः उन्मुक्तभावनया शब्दावलिं व्याहरति।-

द्रष्टव्य- अमेरिका पद्य संख्या -102, 118, 118, 136, 246 ।

पश्चात्यसंस्कृतौ भारतीयनारीणां शालीनता शीलसौन्दर्यञ्च द्रष्टुं न शक्यते। आपणे, जनसंकुलवीथ्यां, सार्वजनिकस्थलेषु यत्र कुत्रापि प्रेमीयुगलः आलिङ्गनबद्धाः परस्परं चुम्बमानः दृश्यन्ते।शर्मसंकोचभयविरहिताः ते केवलं आनन्दानुभूतिमेव सर्वस्वं मन्यन्ते प्रो.रेवाप्रसाद द्विवेदी तेषां नग्नतां वर्णयति -

दृश्या नामिर्यदि मृगदृशां चूचुकद्वन्द्वमात्रे ,
सार्धं पणत्रय्यश्शरीररत्नैर्यूनां समूहैर्निर्मृतं दिनाऽपि। पद्य -102

तरणताले संतरणं कुर्वतीं रमणीमन्यान् च सीमितवस्त्रधारयन्तीं पश्यन् कविः कथयति-

पार्श्वतस्तरणतालकेऽङ्गना काचिदङ्गलयुगांशुकोरुका,
पुप्लुवे स्तनमुखद्वये श्लथां बिभ्रती सुपटिकां शशिप्रभा।
याश्च कापूचन पराः पराङ्गनास्तासु वस्त्रयुगलं हि दृश्यते ।
अर्धपैण्ठमधराङ्कके स्तनाच्छादनं च लघुकञ्चुकं कटौ।। पद्य सं.118/119

सैनफ्रांसिस्को नाम्नि देशे तु रमण्यः पुरुषाणां भयविरहिताः स्वच्छन्दचारिणः अर्धनग्नाः एव मार्गेषु परिभ्रमन्ति।

यस्मिन्नूरुयुतो विहस्तवसना कौपीनमात्रावृता।
सन्धौ यौवनशालिनी गतभयैवास्ते चरन्ती नरैः।। 136

अमेरिकायात्रावर्णने प्रो.रेवाप्रसाद द्विवेदी तस्य समाजस्य पतनपराकाष्ठां वर्णयति यत् तत्र मातारः स्वकीयां युवतीं कन्यां नवयुवकेन सार्द्धं परिभ्रमन् दृष्ट्वा स्वयमपि आनन्दमनुभवन्ति। कदाचित् जामातासार्धेन स्वयमपि सम्बन्धं साधयन्ति-

माता हृष्यति नूत्नयौवनरसे मग्नां निरीक्ष्यात्मजां,
पुसां केनचनापि सार्धमिह वा तत्रापि का भ्राम्यतीम् ।
सापत्न्यं प्रतिपद्यते च सुतया सार्धं सुतावल्लभे,
भुञ्जाना यदि तालमुज्झति रतिः पञ्चेषुणाप्रीणिता।। 236

एवञ्च वैदेशिकानां विविधविसंगतिभिः अभिभूतः कविः स्वकीयं समादरमपि वर्णयति-

अन्यानि सन्ति सुबहूनि विनिर्मितानि, पद्यानि किन्तु नहि तानि पुरस्करोति।
वैदेशिकेष्वपि भवामि धृतादरोऽहं छिद्राण्यतो न विवरीऽमलं भवामि।। 246

प्रो.द्विवदिमहाभागाः अमेरिकादेशे वायुयाननिर्माणस्थलस्य वर्णनमपि कुर्वन्ति-

अंगानि व्योमयानस्य विरच्यन्ते परत्र वै।
योज्यन्ते परत्रेति व्यवस्था तत्र दृश्यते।।
योजितानां समेषां वै प्रतीकानां विलेयना ।
यत्र सम्पद्यते क्षेत्रं तच्च पारेपथः स्थितम्।।
नीयन्ते तु विमानानि यदा तत्र वृहन्त्महो।
मार्गे निरुध्यते कारयानपारम्परी तदा।।
अमेरिका 156-159

पाश्चात्यसंस्कृतौ मांसाहारं मदिरापानं च समधिकं प्रचलति।तामसीभोजनं अपरिपक्वमपि मांसाहारं क्रियते तत्र । द्विवेदिमहोदयः कथयति-

दौर्गन्ध्येन कषामितात्तु लशुनात् यद्वा पलाण्डोर्यवः -
त्वद्धा तृप्तिजोद्यवेन पयसा यस्यात्र का तत्कथा।
तस्मै चन्दन वारि पूतिकलुषात् कुल्याजलान्नाधिकं ।
नाधिक्यं भजते च गौः शुनकतो महात्म्यगाथाजये।।
अमेरिका 241

यूरोपीयदेशे मुस्लिमसमाजे च नारीणां दशा अतीव चिन्तातुरी दृष्टा - बहुपत्नीत्वकुटुम्बेषु पुरुषवर्गाणां स्वातन्त्र्यं, नारीणां परपुरुषैः सार्धं पौनः पुन्येन वैवाहिकपरिवर्तनं वीक्ष्य कथयति कविः द्विवेदिमहोदयः -

तामन्यो नन्दु को नु पिस्पृशतु यो नो भिन्नतामश्नुते ।
कीटात् पूतिकषायितात् कनचिदपि प्रोभिद्यमानात्मनः।।
अमेरिका- 240

अमेरिका देशस्य कामुकता प्रदर्शयन् लिखति कविः स्वीयानुभवम् -

संछन्नत्वं शितिपटकृतं कीदृशं तर्हि घातः ।
अन्यत् सर्वं भवति यदि चेत् संमतं ते कथं तत्।
सूर्ये पश्यत्यपि वरतनूनामितोऽग्रेन यात्रा ।।
आश्लिष्यन्ति च वक्षसाऽमिघटयन्त्याचुम्बननां लम्भिता ।
दिव्याङ्गीर्यदि पुरुषाः प्रतिपदं मार्गेऽपि यान्तः स्फुटम्।
मन्ये तर्हि यतः स्मरः समयवन्मातर्घृतेः सृष्टये ।
तद्यिन्नैव हि काऽप्यमूत्रनु जनन्यत्यन्तमव्याकुला।।
अमेरिका 233- 235

रूसदेशेऽपि एतादृशमेव वातावरणं दृश्यते। तत्रैव नार्यः कौपीनमेव विकिनी इति लघ्वातिशयं वस्त्रं परिधार्य शरीरस्य प्रदर्शनं कुर्वन्ति। दिगम्बर महापात्र महोदयः वोल्गातटे परिभ्रमन्तीनां रमणीनां विषये वर्णयति स्वीयमनुभवम्-

क्रीडन्ति नेत्ररुचिरा युवभिर्युवत्यः,
कौपीनवत्यऽत किं वसनैर्विहीनाः ।
जाले नमस्यमितसम्प्लवसङ्क्रमेण,
सन्दर्शयन्ति तटसाऽतितरां कृतित्वं ।।
पद्य- 23

केचित् स्वपन्ति सिकताशयनेऽङ्गनाभिः।
मन्ये कियावसु-कचोष्म-कट- प्रकाशैरुद्वेजयन्ति मदनस्य मनोरथं ते।
पद्य- 51

पेरिसदेशस्य समाजेऽपि नग्नतायाः स्वरूपं पराकाष्ठायां द्रष्टुं शक्यते। तत्र प्रौढाः वयोवृद्धाः नार्योऽपि अधरोष्ठलालिमां प्रसाधार्य वयोवृद्धैः सार्धं रममाणाः द्रष्टुं शक्यन्ते।

प्रो.ओम प्रकाश पाण्डेय महोदयः वर्णयति स्वकीये रसप्रिया काव्ये -

धनसंग्रहणे न तादृशी ह्युपभोगेषु रतिर्हि यादृशी।
दिनमस्तु निशाऽध्वापरा रतिरेषां हि रतौ सुविद्यते।।
परलोकभयान्मनागपि नहि चिन्ता मनसि प्रवर्तते ।
भयमेतदिहास्ति केवलं महिरोषं गतिताऽथ पुरेव गुम्फितः ।
रमणाय निवेदिका त्वसत्यथ वृद्धापि रसप्रियापुरे ।।

पाश्चात्यसंस्कृतौ नार्यः पुरुषाणामिव उद्यम-व्यवसाय- व्यापारादिक्रियासु कर्तव्यपरायणाः भवन्ति। रूसदेशे महिलाः अश्वारोहणं कुर्वन् वैविध्यं वैलक्षण्यं प्रदर्शयन्ति। पं.दिगम्बर महापात्रः वर्णयति तासां कार्तव्यम् -

अश्वस्य पृष्ठ उपतिष्ठत इन्द्रजालं, सम्यक् प्रदर्श्य युवती खलु धावती धावतो द्राक्।
एवं खगाश्च पशवश्च निजस्वभावं हित्वाऽनुवर्तिसुतवत् वशतां भजन्ति ।
वामा विरच्य खलु कौशलमिन्द्रजालं विस्मापयत्यतितरां निमिषेण लोकान्।
अग्रे विभात्युत न वेति न बुध्यते हा, हन्ताद्भुता तु सकला रचना समेषाम्।।
रुसियाशतकम्- पद्य -26-27

पं.दिगम्बरमहापात्र महोदयः रूसदेशस्य क्रान्तिमभिलक्ष्य तस्य नायकस्य ब्लादीमीरलेनिन महोदयस्य गुणगानं प्रस्तौति-

लेनिन् बभूव निजराष्ट्रशुभाय भव्यो यः श्रद्धधाति इह साम्यपथेऽविशेषम्,
लोका महापुरुषपुङ्गवयामनन्ति विश्वस्य मङ्गलधिया पुरुषार्थनिष्ठम्।।
तद्बोधनादमियता रुसियेतिहासे क्रान्तिः स्वराष्ट्रचरितेन सपं युतास्ति।
आदर्शमेनवबुध्य जनाः श्रयन्ते कार्येषु पौरुषमिह प्रतिपत्तये स्वम्।।
रुसियाशतकम् पद्य-85-86

*******

श्रीपद्मशास्त्रिमहाभागेन प्रणीतं लेनिनामृतम् महाकाव्ये रूसक्रान्तिमभिलक्ष्य पञ्चादश सर्गेषु लेनिन महोदयस्य व्यक्तित्वं कर्तृत्वं च वर्णितं अस्ति। महाकाव्येऽस्मिन् क्रमशः साम्यवादनिदर्शनम्, रूसस्य प्रकृतिवर्णनम्, लेनिनस्य जन्म, छात्रजीवनम, साइबेरियाकारावासः, बोल्सेविकवादस्यान्दोलनारम्भः, जनताकृतः जारशासनस्य विरोधः, लेनिनस्यान्तर्दलीयसंघर्षः, जारशासनस्य पतनम्, पैत्रोगादपुर्यां लेनिनागमनम्, जुलाईविद्रोहस्यासफलता, लेनिनस्य एकाधिपत्यम्, महाप्रयाणम्, रूसभारतमैत्री प्रभृतयः एते सर्गाः महाकाव्येस्मिन् संनिहिताः वर्तन्ते।

श्रीत्रिपुरारिशरणपाण्डेयमहाभागेन प्रणीतं देशदिग्वर्णनमिति काव्ये मार्क्समतावलम्बिनां मतं दृश्यते।

रूसदेशे मानवाः एकतो यावत् भौतिकसुखमनुभवन्ति अन्यतः श्रमसाध्यजीविकां चालयितुं अहर्निशं नराः नार्यश्च कर्तव्यपरायणाः अपि दृश्यन्ते। अकर्मण्यं तत्र नैवाद्रियते। लिखति कविः दिगम्बर महापात्रः -

स्वकर्मदाक्ष्यं वरिवर्ति मान्यं, प्रमाणमास्थापयतीह गीता।
हन्त प्रकृत्यैव निदर्श्यतेऽत्र,स्वकर्मसूत्रं रुसियाख्यदेशे।। पद्य-33
यत्कर्म साध्यं भवतीहयेन, संसाध्यते तेन तदेव नित्यम्,
न कर्मचौरो न च कर्मकुण्ठो,न कर्मकार्यण्यमपि प्रजानाम्।। पद्य-29

प्रो.अभिराज राजेन्द्र मिश्र महोदयः बालीद्वीपे उदयनविश्वविद्यालये डेनपसार इण्डोनेशियादेशे आमंत्रितातिथिआचार्यरूपेण प्रवासं कुर्वन् नैकानि खण्डकाव्यानि विरचितवान्। यथा- विमानयात्राशतकम्, यवद्वीपसाहित्यशतकम्, बालीप्रत्यभिज्ञानशतकम्, बालीविलासम् , मृगाङ्कदूतम् , निमिपालशतकम्, बालीद्वीपे भारतीयासंस्कृतिः, रामायणककविन् अनेकानि गीतानि च।

मिश्रमहोदयः बालीद्वीपस्य संस्कृतिं वर्णयन् लिखति -

बालीवासिनो न केवलं त्रिकालसंध्यां सम्पादयन्ति अपितु तेषां गृहाणां द्वारसमक्षं एकः पूजास्तम्भः पिमिराजन इति नाम्ना स्थितो भवति। तक्षु नामकः देवः गृहरक्षकः मन्यते।सर्वे गृहवासिनः प्रातः- अपराह्न-सायंकालेषु च स्नानं कृत्वा पुष्पमक्षतं गन्धं समर्पयन्ति। एवञ्च व्यापारिणः कृषकाश्च परम्परानुसारेण पूजाविधिमनुपालयन्ति।

लघुपूजागृहं यत्र कृतं प्रतिगृहसम्मुखम्।
पिमिराजनसतं तत् गृहरक्षक दैवतम्।।
आपणद्वारि क्षेत्रे च सर्वमापि दृश्यते।
तत्रद्देवास्पदं रम्यं बालीद्वीपे मनोरमे।।

तत्रैव मिश्र महोदयः अस्माकं देशे यादृशी गङ्गानदीमाहात्म्यं मन्यते तादृशीव बालीद्वीपे पकेरिसान-पेतानू इति द्वयोः नद्योः सङ्गमं अमरावतीमेव सर्वे बालीवासिनः हिन्दूधर्मावलम्बिनः गङ्गानदी इव मन्यमानाः श्रद्धां प्रकटीकुर्वन्ति।

देवसेनां मृतां दृष्ट्वा शत्रुयुक्तिं विचारयन् ।
ततो वज्रप्रहारेण गङ्गामिन्द्रस्समानयत्।।
स्रोतस्तदेव पीयूष प्राणकल्पं पुरातनम् ।
तीर्त-एम्पुलनाम्नैव महावाप्यां विराजते ।।

**शेषभागःषष्टमपुटे**

**पंचमपुटस्य शेषभागः**

तज्जलं बहिरागम्य घर्घरावयसंयुतम् ।
महावेडा महादीर्घा दृश्यते ननु भैरवम्।
नदीभूतस्तदग्रे तदेव सलिलं पुनः ।
तटस्थतीर्थसंसक्तं सान्द्रकुञ्जद्रुमाञ्वितम्।
सिद्धसिन्धुस्वरूपा सा पकेरिसानसंज्ञिका।

वैदेशिककाव्येषु प्रो.सत्यव्रत शास्त्रिणा प्रणीतं थाईविलासम्, प्रो.अभिराज राजेन्द्र मिश्रमहोदयस्य थाईवसुन्धरेयं, बैकॉकनगरी च, प्रो.हरिदत्तशर्मणा विरचितं थाईभूमिरियमिति रचनासु थाईलैण्डस्य वैशिष्ट्यं वर्णितमस्ति । प्रो.सत्यव्रतशास्त्रिणा थाईदेशस्य ऐतिह्यं वर्णयन् ब्रह्मदेशेन थाईदेशस्याधिग्रहणं, थाईदेशस्यमुक्तिसंग्रामं, महामहीवंशस्य रामेत्युपाधिना विभूषितानां नवसंख्यकानां नृपाणां वर्णनं कृतम्। तत्रैव प्राकृतिकदृश्याणां, नगराणां सागरादिविहाराणां समुल्लेखः प्राप्यते।थाईदेशे बौद्धभिक्षूणां बाहुल्यं प्रदर्शयन् कथयति कविवर्यः -

सहस्रशः सम्प्रति भिक्षवोऽत्र शास्त्राणि सम्यक् परिशीलयन्ति।
आवश्यकं वस्तु जनस्तदर्थं स्वयं ददाति स्वहिताप्ति कामः ।
उच्चार्यमाणाति पदे पदेञ्च विहारभूमिष्वितस्त्र चापि।
वमन्ति शाक्यस्य मुनेर्वचांसि पीयूषधारां श्रुतिशष्कुलीषु।।
शान्ताकृतेः शाक्यमुनेरपूर्वा मूर्तिं शुभां मारकतीं दधाना।
भक्तैर्भृता सन्ततमेव सद्भिर्विराजते यत्र विहारभूमिः।।

प्रो.राधावल्लभत्रिपाठिमहोदयः स्वयमपि थाईलैंडस्य शैक्षणिकप्रवासकाले तस्य देशस्य संस्कृतेः स्वरूपं ज्ञातुं प्रयतते। स्वकीये धरित्रीदर्शनं खण्डकाव्ये विमानयात्रानुभवं प्रस्तौति श्लोकेऽस्मिन् -

किं क्षीराब्धेरुपरि च शनैः स्यन्दमानैव नौका ।
राशेराहो ह्युपरि यशसां धूयमाना पताका ।
मेघानां स क्षितिजपुलिनादास्तृतीयां विमानो ।
मध्ये गच्छन् रवविरहितो लक्ष्यते कृष्यमाणः ।।

धरित्रीदर्शनम्- प्रो.राधावल्लभ त्रिपाठी श्लोक, 4/5
पद्य-7-8

प्रो.हरिदत्तशर्महोदयः स्वकीये शैक्षणिकसांस्कृतिकसन्दर्भेषु वैयक्तिकपर्यटने वा विविधवैदेशिकप्रवासस्यानुभवं विविधेषु काव्येषु वर्णयन्ति ।तेषां महोदयानां नैकेषु देशेषु प्रवासः जातः - यथा जर्मनी-फ्रांस-नीदरलैण्ड-आस्ट्रिया-थाईलैण्ड-इटली- मलेशिया-इण्डोनेशिया-मॉरिशस-स्कॉटलैण्ड-अमेरिका-जापानादिविदेशेषु प्रवासं कृत्वा अनेकानि काव्यानि विरचितवानिति। तस्य वैदेशिकाटनम् महाकाव्यमति महनीयं मन्यते। पेरिसनगरीयम्, नवसंसारं कारं कारं इति नैकानि गीतानि प्रणीतानि वर्तन्ते। सुकविरयं स्वकीये पर्यटनमितिगीतिकायां लिखति स्वानुभवम्-

देशे देशे द्वीपे द्वीपे कुर्वन् पर्यटनम्।
संस्कृत-संयात्री न हि विरमति दैवकृतं घटनम्।।
नवनवानुभवजालसहस्त्रं दृश्यं नवमयनम्।
नवविमानपत्तनमभिरामं यन्त्रखगोड्डयनम्।।
गगने पवनपथः प्रपूरितो विततमहो ध्वानम्।
उड्डीनैस्तैर्विविधविमानैर्विहितं दिड्मानम्।।
सारस्वतं शैक्षिकं भव्यं भवति हि पर्यटनम्।
अवनिरङ्गभुवि सदा दृश्यते प्रकृतिनटीनटनम्।।
विश्वविधातुर्विविधा रचना लीलायते मुदा।
प्रकृतिनटी सौन्दर्यदर्शनैः सम्मोहयति सदा।।
देश-वेष-भाषा-वैविध्यं बहुवैलक्षण्यम्।
मनुजधर्मसाधर्म्यं वहति हि धृत्वा वैधर्म्यम्।।
दूरत्वं पौरस्त्य-प्रतीच्योः संस्कृत्योर्नष्टम्।
पारस्परिकाचारविचारैर्हृदयं संदृष्टम्।।
संस्कृत-संस्कृतिदूतत्वं यो वहति स्थायिपदम्।
हृदयेष्वेव पदं स निधत्ते सर्वेषां सुखदम्।।
ज्ञानदानप्रदानैर्बहुधा गहनैर्व्याख्यानैः ।
आराधिता वर्धते वाणी चङ्क्रमणैर्यानैः ।।
विश्वरूपपुस्तकपठनेन तु चिन्तनमतिगहनम्।
याने याने तत्वविबोधः सततं चङ्क्रमणम्।।

नवेक्षिका- गीत-23 पृ.73

शोधपत्रप्रस्तोत्रा मया डॉ.राजेन्द्र त्रिपाठी 'रसराजेन' स्वकीये रसराजतोषिणी

नामेति संस्कृतगीतसंग्रहे थाईलैण्डस्य बैकॉकनगरे आयोजिते विश्वसंस्कृतसम्मेलने प्रतिभागं गृहीत्वा स्वानुभवः गीतेऽस्मिन् समुपस्थापितः -

यदा बैंकॉकनगरेऽहं विश्वसम्मेलने यातः ।
तदा मार्गेऽपि रमणीयो भव्यलोको मया भातः ।।
सुदीर्घं दिव्यरमणीयं बौद्धमठमन्दिरं दृष्ट्वा,
मनो मे मोदसंवलितं प्रहर्षश्चापि सञ्जातः।।
फलैर्भिन्नैर्विविधवर्णैः पूरितैः स्वादमाधुर्यैः ।
रसास्वादैर्मधुर्दृश्यैर्हार्दहर्षो हि सम्प्राप्त।।
विशिष्टा ब्रह्मणः पूजा तत्र मुख्यार्चना दृष्टा ।
समेषां तत्र भवनाग्रे ब्रह्मदेवालयः ख्यातः।।

3-अर्वाचीनगद्यविधायामपि प्राचीनपरम्परामनुश्रित्य नवीनविधायाः प्रयोगोऽपि दृश्यते। कथा-आख्यान-आख्यायिका-परिकथा-खण्डकथा-सकलकथा-कथानिका-निदर्शन-प्रवह्लिका-मणिकुल्या- वृहत्ककथा-उपकथा-आलाप-संकीर्णादि विविधविधानां उल्लेखः अभिराजराजेन्द्रमिश्रमहोदयेन स्वकीये निबन्धे विस्तारेण कृत ।

(नईसहस्राब्दी की संस्कृत- रचनाधर्मिता)।

तेन मतानुसारेण अर्वाचीनोपन्यासविधायां कथा-आख्यायिका द्वयोः लेखनं भवति किन्तु काचित् नव्याः विधाः अपि प्रयुज्यन्ते ।यथा- लघुकथा-कथानिका( कहानी) -दीर्घकथा इति। एताः विधाः आंग्लविधायाः प्रकाराः कथिताः। ( तत्रैव)

लघुकथायाः लक्षणं प्रतिपादयति मिश्रमहोदयः-
नातिविस्तृतसन्दर्भा विद्युदुन्मेषसन्निभा।
नूनं लघुकथेयं स्यादेकपात्रावसायिनी।।
उल्कापिण्डसदृक्षाभा हृत्तन्त्रीझङ्कृतिक्षमा।
अल्पाक्षराऽल्पात्रापि कथा लघ्वी महीयते।।

प्रो. मिश्रमहोदयेन स्वयमेव सिंहसारि- राङ्गडाप्रभृतयः कथाः बालीद्वीपावलम्बिता एव प्रणीताः। एवमेव अभिनवपञ्चतन्त्रस्य खण्डमेक बालीद्वीपव्यथाश्रितमेव वर्तते।;;

(अभिराजयशोभूषणम् 4/13-17)

नाट्यविधायामपि प्राचीनपरम्परायां परिवर्तनं प्राप्यते। एकांकी-नाटक-नाटिका-प्रकरणादि- प्रकृतिषु परिवर्तनं जायते ।डॉ.वेंकटराघव- वीरेन्द्रकुमारभट्टाचार्य-श्रीधरभाष्करवर्णेकर-रामचन्द्रडु-जग्गूबकुलभूषण- पं.पूजालाल- नारायणशास्त्रीकाङ्करः - परीक्षित- रामशीषपाण्डेय- अभिराजराजराजेन्द्रमिश्र-राधावल्लभत्रिपाठि-शिवजी उपाध्याय- रामजी उपाध्याय- वेदकुमारी घई- मिथिलेशकुमारी मिश्र- प्रो.हरिदत्तशर्म- जीवन्यायतीर्थ-कीर्तिवल्लभशक्टा-कृष्णलाल- वनेश्वरपाठक-बलभद्रप्रसादगोस्वामि-घनश्याम त्रिवेदि- हरिनारायण दीक्षित-स्वामिरामभद्राचार्य-इच्छारामद्विवेदि-जनार्दनपाण्डेयमणिप्रभृतयः अर्वाचीननाट्यकाराः स्वकीयासु कृतिषु समसामयिकघटनां प्रयुज्य नवाभिलेखनं प्रकुर्वन्ति। काचित्कृतयः समुद्धृताः सन्ति।

आचार्यरेवाप्रसादद्विवेदिनः यूथिका- सप्तर्षिकांग्रेसञ्च, रामचन्द्रडुकृत- सुसंहतभारतम्, वी.आर.शास्त्रिकृत- प्रबुद्धभारतम्, जग्गूबकुलभूषणविरचित- जग्गूभूषणरूपकवितानम्-मुग्धकुन्तलम्-प्रबुद्धप्रज्ञम्-कौमुदीयम्- वीरसौभद्रम्- व्रतफलम्- कलिकालुष्यम्-दाशरथिदर्शनम्- स्यमन्तकम्- मैरेयपारम्यञ्च। अरविन्दाश्रमे सेवारतः पं.पूजालालद्वारा प्रणीतानि बालनाटकानि यथा-परमहंसः - आनन्दविहारः- गुरुदक्षिणा- पार्वतीपुत्रकम्- कृष्णयशोदीयम्-उद्यानगमनम्-ऐन्द्रजालकम्-मूर्खराजकम्- कृष्णसत्यभामीयम्-देवश्रीदर्शनम्- श्रीपार्वतीसम्भाषणम्-सुशीलशीलकमित्यादि प्रसिद्धानि सन्ति।

प्रो.अभिराजराजेद्रमिश्रस्य प्रशान्तराघवम्- लीलाभोजराजम्-प्रमद्वरा- विद्योत्तमा, रूपरुद्रीयम्( एकादशरूपकम्),नाट्यनवरत्नम्, नाट्यनवार्णवम्, चतुष्पथीयममित्यादिषु नाट्यकृतिषु समाजस्य राष्ट्रस्य च समसामयिकसमस्यां घटनां चावलम्ब्य तेन महोदयेन सरसशब्दावल्यां वर्णनं सम्पादितम्।

प्रो.हरिदत्तशर्मणः त्रिपथगा-आक्रन्दनम्- सुप्रतिष्ठितनाट्यकृतिषु साक्षात्करीयम्- वधूदहनम्- द्वेषदंशनम्-पञ्चनदपीडनम् - एकमेव रक्तम्- वृकविक्रोशनम्-अबलावलमादि कृतयः सामाजिकसमस्यानुद्घाटयन्ति।

प्रो.राधावल्लभत्रिपाठिनाप्रणीतं तण्डुलप्रस्थीयम्,( प्रकरण) प्रेमपीयूषम्, ( नाटकम्) प्रेक्षणकसप्तकम् ( सप्तएकांकीसंग्रहः) नाट्यकृतयः प्रसिद्धाः सन्ति। एतेष्वपि समाजस्य देशस्य च बहुविधदशां वर्णयति श्रीत्रिपाठिवर्याः ।

अर्वाचीनकाव्यविधायां कालोऽयं स्वर्णकालः मन्यते। स्वतन्त्रतामाप्तुं संस्कृतकवयः संस्कृतगीतमवलम्ब्य राष्ट्रियभावनामुद्बोधयितं गीतसंरचनामाध्यमेन जनान्दोलनमुपस्थापयन्ति। एतेषु कविवर्येषु प्रमुखतमाः आसन् पं.जानकीवल्लभशास्त्री, पं.प्रभातशास्त्री, पण्डिताक्षमाराव, डॉ.श्रीधरवर्णेकर इत्यादयः।

स्वातन्त्र्योत्तरयुगे संस्कृतगीतविधा न केवलं काव्येष्वपितु मञ्चेष्वपि मुखरिता बभूव। अनेके संस्कृतकवयः न केवलं भारते विदेशेष्वपि स्वीयगीतमाधुरीमास्वादयन्तः संस्कृतं प्रति सरसतां माधुर्यं च प्रावर्धयन्ति ।संस्कृतनवगीतपरम्परायां प्रमुखाः कवयः सन्ति । डॉ.श्रीनिवासरथ ,आचार्य बच्चूरामअवस्थी, अभिराज डॉ. राजेन्द्र मिश्र, डॉ.भास्कराचार्य त्रिपाठी,डॉ.रमाकान्तशुक्ल , डॉ.कमलेशदत्त त्रिपाठी, डॉ.नलिनी शुक्ला , डॉ.वीरभद्र मिश्र , डॉ.जगन्नाथ पाठक,डॉ.शिवशरण शर्मा, म.स.आपटीकर, श्री हर्षदेव माधव,डॉ.सत्यव्रत शर्मा 'अजेय , डॉ.पुष्पा दीक्षित, डॉ.राधावल्लभ त्रिपाठी, डॉ.हरिदत्तशर्मा, डॉ.इच्छाराम द्विवेदी 'प्रणव', डॉ.प्रशस्यमित्र शास्त्री, ।डॉ.जनार्दनपाण्डेय 'मणि': डॉ.राजेन्द्र त्रिपाठी 'रसराजः' अरविन्द कुमार तिवारी, राजकुमार इत्यादयः सुपरिचिताः ज्ञायन्ते। डॉ.रेवाप्रसाद द्विवेदी 'सनातन' , डॉ. सत्यव्रतशास्त्री , डॉ कपिलद्विवेदी ,डॉ.शिवदत्त चतुर्वेदी, डॉ परम हंस मिश्र, पं.वासुदेव द्विवेदी एतेऽपि कवयः महाकवयः प्रमुखाः सन्ति।

इदानीमपि नवोदिताः कवयः स्वकीयगीतमाधुर्येन मञ्चेषु, दूरभाषस्य आमुखपटलेषु संस्कृतस्य प्रचाराय प्रसाराय च संलग्नाः दृश्यन्ते।

साम्प्रतिककवयः सामयिकसमस्यां घटनां चाधृत्य तात्कालिकीं रचनाः विरचयन्ति। आतङ्कवादं , पर्यावरणं, स्वच्छभारतं, योगाभ्यासं,भ्रूणहत्यां, कन्यासंरक्षणं, नारीरक्षणं, साम्प्रदायिकसद्भावनामाधृत्य सद्यः सञ्जातसंघटनां दुर्घटनां वा सम्प्रेक्ष्य न कोऽपि एतादृशः कविः दृश्यते यो स्वकीयां लेखनीं न चालयति इति ।

बहुचर्चितदामिनीघटनामभिलक्ष्य लिखति त्रिवेणीकविवरोऽभिराजराजेन्द्रमिश्रः दामिनी दलिता इति गीतेऽस्मिन्-

म्रियन्ते प्रावृषि प्रायो जनाः किल दामिनी पातात् ।
विधे! किमिदं नु सञ्जातं खलैर्यद् दामिनी दलिता।।
प्रसूरोदिति पिता रोदिति गृहे गृहिणी न किं रोदिति।
ध्रुवं तिष्ठन्ति बन्धो ! मन्दिरेऽपि च देवता रुदिताः ।।
पृथिव्या यत्र मातृत्वं प्रतिष्ठितमार्षसंस्कृत्या।
अहो राष्ट्रे नु तस्मिन् भारते किं साम्प्रतं भविता ।।

औदुम्बरी/36 मिश्रोऽभिराजराजेन्द्रः

समाजे बहुविधाः विसंगतयः परिवृताः सन्ति। विक्षुब्धाः कवयः स्वकीयेषु गीतेषु प्रकटयति आत्मपीडाम्। तेषां गीतसंग्रहेषु नैकानि गीतानि सन्ति किन्तु काचिदेव पंक्तयः समुद्धृत्य परिचयं प्रस्तौमि।

आतंकवादमवेक्ष्य लिखति प्रो.हरिदत्तशर्म महोदयः- यथा
दिल्ली ज्वलति मुम्बयी दग्धा
चाक्रान्तं कश्मीरं रे!
अङ्गेऽङ्गे भारतमातुर्मे
हा हिंसनं गभीरं रे! हा छेदनं गभीरं रे! हा खण्डनं गभीरं रे!!
आततायिनो ह्युग्राः के ते, लोकघातनो लोकाः।
के ह्यातङ्ककारिणो हत्या-करा जनाः कृतशोकाः ।।
उद्गिरन्ति बहुविषं विषधारा देशे पीत्वा क्षीरं रे!!

डॉ.रमाकान्तशुक्लमहोदयस्य भाति मे भारतमिति संस्कृतगीतं को न जानाति संस्कृतजगति। शुक्लमहोदयः सर्जिकलस्ट्राइक इति घटनामाश्रित्य तत्कालमेव लिखति गीतम्-

जय जयभारतभट! साधु साधु,
शोभनं कृतं शोभनं कृतम्।।
आतङ्कवादशाला ध्वस्ता।
शोभनं कृतं शोभनं कृतम्।।
शल्यचिकित्साक्रमणं कृत्वा,
कल्पनातीतकौशलं कृतम्।
आशीविषस्य दंष्ट्रोत्खाता ।
शोभनं कृतं शोभनं कृतम्।।
आतङ्कपोषको निजपरिषदि।
आस्ते किंकर्व्यविमूढः,
विक्रमं सैनिकैः स्वं प्रदर्श्य।
शोभनं कृतं शोभनं कृतम्।।
निर्धनस्यावस्थां दर्शयन्

जनवादीकविः प्रो.राधावल्लभत्रिपाठी रोटिकालहरीमालिख्य समाजस्य वस्तुस्थितिं मुद्घाटयति-

हालिको मालिको भालदर्शी तथा कौलिको मौलवी जालजीवी तथा।
अस्तु वाऽऽध्यापको वापि नेता तथा रोटिकायाः कृते ते समे जीविताः।।
अर्ज्यते रोटिका केनचित्स्वैः श्रमैः स्वेदधाराञ्चितैरुच्छ्वसद्बाहुभिः।
खाद्यते निःश्रमं तुन्दिलश्रेष्ठिभिः गौर्गलीन् ह्रेपयद्भिः कुलाङ्गारकैः ।
केनचित्प्राभृतौ प्राप्यते रोटिका केन वोत्कोचमादाय सा प्राप्यते ।

**शेषभागःसप्तमपुटे**

**षष्टमपुटस्य शेषभागः**

अग्रहस्तं पुरः सारयित्वा मुहुर्दीनैः स्वरैः कैनचिद् भिक्ष्यते।। लहरीदशकम् ( रोटिकालहरी ) - नई सहस्राब्दी में संस्कृत/206

राष्ट्रियभावनामाधृत्य संस्कृतकवयः वैश्विकसद्भावनां संवर्धयन्ति-

चिन्तनीयं सदा मङ्गलं मङ्गलम् ।
वर्तनीयं सदा मङ्गलं मङ्गलम्।।
विष्ठया लेपनं भूतले न श्रुतम्।
लेपनीयं सदा चन्दनं चन्दनम्।।
निन्दया वा परेषां किमास्वाद्यते।
कीर्तनीयं सदा वन्दनं वन्दनम्।।

मृद्वीका/8 मिश्रोभिराजराजेन्द्रः

स्वतंत्रतायाः सम्मानं कथं स्यात् चिन्तयति कविवर्यः पुनश्च गीतेऽस्मिन्-

मामके हि भारते कीदृशी स्वतंत्रता ?
पूतजाह्नवीजलं कैर्हलाहलीकृतम् ?
भेदभावदृष्टिभिर्दीयते समग्रता।
मामके हि भारते कीदृशी स्वतंत्रता ?
एत भारतीसुताःब्रूत कण्ठसङ्गताः
नो वयं पृथक्श्रिता नो वयं पृथङ्मताः
हिन्दुसिक्खमुस्लिमैरस्मिता विनिर्मिता
मामके हि भारते कीदृशी स्वतंत्रता ।।

पुरुषार्थवन्तः मानवा एवं समृद्धिं साफल्यमाप्नुवन्ति लिखति कविः प्रणवः - प्रो.इच्छारामद्विवेदिमहाभागः -

ये तीव्रया विजिगीषया पुरुषार्थवन्त इहोद्यताः ।
तेषां कृते गगनङ्कुषः शैलोऽपि तुच्छकणायते।
यद्भालपट्ट-सुलेखकेन सुटङ्कितं च शुभाऽशुभाम्।
तज्जीवने मनुजस्य मित्र! सदैव वज्रशिलायते।। - गीतमन्दाकिनी /79

डॉ.कमलेशदत्त त्रिपाठिमहोदयोऽपि अनाहतपौरुषं वन्दते गीतेऽस्मिन्-

मुद्रितं चित्तं विधातुं ये यतन्ते, ये यतन्ताम्।
मया तु त्वन्मनोभूमावुप्यते स्वप्नः समिद्धः ।।
निरातङ्कं सुप्यतेऽरण्ये परीते।
वह्निना धग्धगिति सञ्ज्वलता विशून्ये।।

डॉ.पुष्पा दीक्षित सामाजिक संवेदनामनुभूय राष्ट्रियास्मितारक्षायै गीतेऽस्मिन् वेदनां प्रकटयति-

समायान्ति स्वकं गेहं यदा विप्रास्तपोनिष्ठाः।
समुत्थाय प्रहर्षैर्नाभिवन्दते नरास्ते के।।
कुलस्त्री चत्वरे यान्ती बलादाकृष्यते नीचैः।
तथाप्येतान् सभामध्येऽनुमोदन्ते नरास्ते के।।
सुताः क्षामानना जीर्णैः पटैराच्छादिता वामा।
विपत्तावाप्तकामा ये न याचन्ते नरास्ते के।। ( नई सहस्राब्दी में संस्कृत)

गीतविधामनुसृत्य मयापि बहूनि गीतानि विरचितानि । 'रसराजतोषिणी ' इति नाम्नि संस्कृतगीतसंग्रहे प्रकाशितानि च। क्वचिद्गवद्गवद्भक्तिमनुसृत्य वाणीवन्दनम्, शिवस्तुतिः, कृष्णभक्तिः, तीर्थराजप्रयागः, राष्ट्रभक्तिः,भारतीयासंस्कृतिः, क्वचिद् वन्देमातरम्, पर्यावरणम्, स्वच्छभारतम्, आतङ्कवादः, कथं काश्मीरं, गोरक्षणनम्, विमानयात्रा, गङ्गा, वर्षाराज्ञी, मधिमासः, ग्रीष्मर्तुः, इत्यादिविविधशीर्षके लिखितानि सन्ति।

राष्ट्रवन्दनं कुर्वन् गायति कविरसराजः -

राष्ट्रवन्दनं करोमि राष्ट्र! वन्दे मातरम् ।
मातृभू-समर्चनं निवेद्य वन्देमातरम्।।
गौरवं हि मन्यते विधाय विश्वमङ्गलं,
देशहेतवे समर्पयामि वन्देमातरम्।।

संस्कृतस्य गुणगानं करोति कविः गीतेऽस्मिन् -

ग्रामे नगरे देशे विश्वे वन्दे संस्कृतमातरम्।
अत्र तत्र सर्वत्र भारते वन्दे संस्कृतमातरम्।।
गायं गायं गीतं मधुरं ध्यायं ध्यायं संस्कृतम्।
वारं वारं पठने कथने वन्दे संस्कृतमातरम्।।

एवञ्च बहूनि गीतानि सन्ति येषु विविधान् विषयानाधृत्य कविना स्वानुभूतिं प्रकटीकृता।

एवञ्च बहवः कवयः संस्कृतकाव्यरचनायां आधुनिकसमये संलग्नाः सन्ति। तेषु प्रमुखाः नामोल्लेखाः प्रतिष्ठिताः वर्तन्ते।

मान्याः मनुदेवभट्टाचार्य- विन्ध्येश्वरी प्रसाद मिश्र- बृजेशकुमार मिश्र- ओमप्रकाश पाण्डेय-प्रभुनाथ द्विवेदी- बलदेवानन्द सागर- जीतरामभट्ट-महेश झा - राजेन्द्र त्रिपाठी 'रसराजः'- चिन्तामणि जोशी- रामसुमेर यादव-महावीरप्रसाद सारस्वत- निरंजन मिश्र- राजारामशुक्ल- उपेन्द्र पाण्डेय- कमला पाण्डेय- नलिनी शुक्ला - नवलता- मनुलता-सुरचना त्रिवेदी- धर्मदत्त चतुर्वेदी- वनमाली विश्वास-कौशल तिवारी-कृपाराम त्रिपाठी- राजारामशुक्ल- रामविनय-सिंह- लक्ष्मीनारायण पाण्डेय-बलरामशुक्ल- लोकेशकवि- शैलेश तिवारी- राजकुमार मिश्र- सम्पदानन्द मिश्र- प्रदीपकुमार नन्द- शिवराम शर्म- ताराशंकर शर्म-शरदिन्दु त्रिपाठी- विवेक पाण्डेय- प्रतापकुमार मिश्र- स्वर्णकुमार मिश्र- बृजकिशोर त्रिपाठी- प्रेमशंकर शर्म- संजय चौबे-श्रेयांश द्विवेदी- मदनमोहन झा- अरविन्दकुमार तिवारी- हेमचन्द्र बेलवाल- प्रमोद शर्म-परमानन्दझा- ऋषिराज पाठक-राजवीरशास्त्री- शशीकान्त- प्रकाश पन्त-अरविन्द नारायणमिश्र- लालमणि पाण्डेय- केशवप्रसाद गुप्त-प्रभृतयः कवयः संस्कृतकाव्यलेखने सततं निरताः सन्ति।

4-अर्वाचीनगीतविधा संस्कृतकाव्यस्य सर्वाधिकलोकानुरञ्जिनीविधा मन्यते साम्प्रतिकसमये गीतविधा यद्यपि प्राचीनकालादेव संस्कृतसाहित्ये प्रचलति स्म। गीतगानमिमेसमे- गीतं गानं गीतिः इति सर्वं पर्यायभूतमेव मन्यते। कालिदासः स्वयमपि 'अहो रागपरिवाहिणी गीतिः' इति प्रयुन्यति अभिज्ञानशाकुन्तले। 'तवास्मि गीतरागेण हारिणा प्रसभं हृता'

मेघदूतेऽपि-

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्यवीणां,
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयन्ती कथञ्चिद्,
भूयोभूयः स्वयमपिकृतां मूर्छनां विस्मरन्ती। - उत्तरमेघदूत

मृच्छकटिकनाटके शूद्रकोऽपि गीतलक्षणं प्रस्तौति -

रक्तञ्च नाम मधुरं च समं स्फुटञ्च भावान्वितञ्च ललितं च मनोहरञ्च।
मृच्छकटिक- 3/4

कालान्तरे जयदेवकविना प्रणीतं गीतगोविन्दं रागकाव्यपरम्परायाः ललितं काव्यं मन्यते।

अर्वाचीनलोकगीतविधा संस्कृत काव्यस्य लोकप्रियविधा मन्यते। अस्याः लक्षणं विदधाति मिश्रोऽभिराजराजेन्द्रः -

यत्पुनर्गीयते स्वैरं यथाकण्ठं यथासुखम् यथाजनपदग्रामकुलजातिपरम्परम्।।
तच्च सद्योरसानन्ददायकं गतबन्धनम्। शास्त्रसिद्धान्तनिर्मुक्तं लोकगीतं समुच्यते।।
रागकाव्यगता रागा यथा गान्धर्वसम्मताः। तथैव लोकगीतानां रागा लोकानुमोदिताः।
प्रमाणं लोकगीतानां लोकएव हि केवलम्। यथावदङ्गीकर्तव्यं ततस्तद्धि यथास्थितम्।।

अभिराजयशोभूषणम् -

मिश्रमहोदयेन लोकगीतविधायाः विविधस्वरूपं विभेदं च न केवलं वर्णितमपितु तासां विधां लक्षणानि उदाहरणानि च प्रतिपादितानि। यथा-

सूतगृहम् (सोहर), वटुकम्( बरुआ), नक्तम्( नकटा), उत्थापनम्(उठान), प्रचरणम् ( पचरा), चैत्रकम्( चैता), चतुस्तालम् ( चौताल), फाल्गुनिकम् (फाग- फगुआ), होलोत्सवगीतम् ( होरीगीत), स्कन्धहारीयम्( कहरवा), औष्ट्रहारिकम् (ऊँटहारा), लाङ्गलिकम् ( लांगुरिया), रसिकम्( रसिया), कजरी (कजरी)।

एवञ्च फारसी-उर्दू-गज़लविधामाश्रित्य संस्कृतेऽपि मिश्रमहोदयेन 'गलज्जलिका' इति नामकरणं विहितम्।

अर्वाचीनसंस्कृतकाव्यविधायां छन्दोमुक्तमयिविधायाः बहुप्रयोगं दृश्यते। केचिज्जनाः

विधामेषांगद्यस्वरूपं मन्यते। किन्तु वेदेष्वपि 'सर्वेवेदात्प्रसिद्ध्यति- ' गद्योऽपि पद्यमिव मन्यते।

आचार्यभरतमुनिः स्वयमपि लिखति यत्-

छन्दोहीनो न शब्दोऽस्ति न च्छन्दः शब्दवर्जितम्।
तस्मात्तूभयसंयुक्ते नाट्यस्योद्योत्यके स्मृते।। - नाट्यशास्त्र-14.40

छन्दोमुक्तकवितायाः लक्षणं प्रतिपादयति मिश्रोभिराजराजेन्द्रः-

गद्यपद्योभयात्मेदं छन्दोमुक्तं हि वाङ्मयम्।
पद्यात्मकलयेनैव यद्धि गद्येन लिख्यते।।
अभिराजयशोभूषणम् प्रकीर्ण-100
वस्तुतो लयवाहीदं गद्यमेव न चापरम्।
प्रसिद्धमाङ्गलभाषायां रिद्मिकप्रोज़संज्ञया।।

तदेवं छन्दोमुक्तं परिभाषितम् लयवाहिगद्यमेव च्छन्दोमुक्तमिति वाच्यम्। तच्च गद्यपद्योभयात्मकं भवति, गद्यपद्योभयगुणाधानत्वात्। तदेवाङ्गलवाचि रिद्मिकप्रोज़ इत्युच्यते।-

संस्कृत का अर्वाचीन समीक्षात्मक काव्यशास्त्र - मिश्रोभिराजराजेन्द्रः /430

आधुनिकसंस्कृतकाव्ये वैदेशिककाव्यस्य प्रभावः तस्य प्रवृत्तिश्च बहुप्रचलितं वर्तते। नैके कवयः अस्यां विधायां सुप्रतिष्ठिताः मन्यन्ते। सानेट-हाइकू( जापानी)- तान्का- सीजो( कोरियाई) प्रभृतयः वैदेशिक छन्दासि संस्कृतकाव्येऽपि प्रभूतरूपेण प्रयुज्यमानानि वर्तन्ते।

डॉ.हर्षमाधवः प्रसिद्धोऽस्ति एताषां विधानां काव्यसंरचनाय-

जुलेर्वनवत् नाणटेस- नगरे
लोयरनद्यां कदाचित्।
साहसिको भूत्वा रहस्यमयं द्वीपमन्वेष्टुं विचारयामि।
कदाचित् सर्वारिसस्य उपन्यासनायकवत् पराक्रमाय गन्तुं विचारयामि।

निष्क्रान्ताः सर्वे - पृ.120 (त्वां प्राप्तुम्) - नई सहस्राब्दी में संस्कृत/224

अद्यत्वे नवोदिताः केचन् वरिष्ठाः अपि कवयः दूरभाषयन्त्रे आमुखपटले विविधसंस्कृतसमूहेषु संस्कृतस्य प्रचाराय प्रसाराय च दृढससंकल्पाः दृश्यन्ते। नित्यनूतनरचनाभिः व्याख्यानादिप्रसारेण संस्कृतरचनाकाराणां परिचयोऽपि सञ्जायते। छन्दोबद्धरचनाः गीतानि मुक्तककाव्यानि च प्रकाश्यन्ते। संस्कृत-ई-पत्रिकाः संगणकयन्त्रेषु साप्ताहिक-मासिक-त्रैमासिक-षाण्मासिक-वार्षिक्यः वा निरन्तरमधुना प्रकाश्यन्ते च।

**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-**

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

Girish Kumar Bansal,Manager
**Vidya Deep Public School**
(Govt. Recognised)
C-400/A, Main Market
Bhajan Pura, Delhi-110053
Mob.: +91-9555955591
+91-9810067099,+011-22563764

**लेखकानां कृते निवेदनम्**

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम् इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# बालश्लोकनिर्माणकार्यशाला सम्पन्ना

वार्ताहरः आचार्यो राघवेन्द्र भट्टः गुरुग्रामः

अद्य श्रावण कृष्णचतुर्थ्यां संवत् 2075 सोमवासरे शृंगेरी



वेदपाठशालायां गुरुग्रामे हरियाणा संस्कृत अकादमी पञ्चकूला पक्षतः 'बालश्लोकनिर्माण- कार्यशाला' समायोजिता तत्र छात्राः श्लोकनिर्माणं कृतवन्तः। अस्यां कार्यशालायां मुख्यरूपेण डॉ श्रेयांश द्विवेदी उपाध्यक्ष



हरियाणा संस्कृत अकादमी पञ्चकूला आसन्। द्विवेदी महोदयः सर्वप्रथमं वर्णमालाया अभ्यासं कारितवान्, अनन्तरं लघु गुरु विषयकं अभ्यासं कारितवान्। अस्मिन्नवसरे ते सर्वेभ्यः एकं एकं पदं स्वीकृतवान्। अनन्तरं छात्राः सोत्साहं अनुष्टुप छन्दसि शलोकनिर्मणे योग्यता अभवन्। अयं प्रयोगःसफलोह्यभवत। कार्यशालायाःअन्ते सर्वे छात्राः सोत्साहं प्रोक्तवन्तः यद् वयं प्रतिदिनं श्लोक निर्माणं करिष्यामः।




**प्रथमपुटस्य शेषभागः**

## सप्तदशविश्वसंस्कृतसम्मेलनस्यायोजनं कनाडादेशस्य....

सहृदयश्रोतानभिभूतीकृताः।

समापनसत्रे सायंकाले पुनश्च नेस्टभवनस्य बैक्वटसभागारे स्वादिष्टभोजनाय सर्वे विद्वांसः समाकारिताः। सम्मेलनस्य संयोजकः



अधीशसाथ्वे विशिष्टान् महानुभावानाहूय सम्मेलनस्य समापनसत्रस्यौपचारिकतां निर्वाहितः। तत्रैव आगामि विश्वसंस्कृतसमेलनस्य आयोजनस्य घोषणापि कृता। आस्ट्रेलियादेशस्यराजधान्यां केनबरा नगरे अष्टादशविश्वसंस्कृतसम्मेलनस्यायोजनं भविष्यतीति समुद्घोषितम्।



अत्रैव अनेकानि पुस्तकान्यपि लोकार्पितानि जातानि। प्रो.हरिदत्त शर्मणः वैदेशिकाटनमिति महाकाव्यस्य लोकार्पणं सम्पादितम्।

# योगगुरु-स्वामि-रामदेव महोदयेन सह महासम्मेलनार्थं चर्चा-आशीर्वादार्थम् आगमिष्यन्ति योगगुरवः

अन्तराष्ट्रिय आर्य सम्मेलनं दिल्ली 2018 इत्यस्यार्थं प्रख्यात सन्त स्वामी रामदेवजी महोदयेन सह सार्वदेशिक सभायाः सदस्याः



तेषां पतञ्जलि संस्थाने गत्वा अमिलत। अस्मिन्नवसरे आर्य समाजस्य गतिविधिनां एवं प्रचार-प्रसारस्य चर्चा अभवत्। स्वामी महोदयेन वार्तालापस्य प्रमुख्य प्रयोजनं अक्टुबरमासे आयोज्यमान अन्ताराष्ट्रिय आर्य सम्मेलने तान् आमंत्रित करणमासीत्। अस्मिन्नवसरे सन्यासाश्रमे प्रावेशीत संन्यासी एवं साध्वी एवं ब्रह्ममचारीगणेन सह मेलनमभवत्। सर्वस्मिन पक्षतः तानपि आर्य समाज व महासम्मेलनस्य सूचना प्रदत्तम्। प्रसन्नतायाः विषयोऽस्तियत् स्वामीजी एते सर्वे संन्यासी साध्वी एवं ब्रह्मचारीगणं येषां संख्या 4000 आसीत् तैः सह कार्यक्रमे भविष्यति। प्रायसः चतुर होरापर्यन्तं मेलने अनेक सामाजिक एवं राष्ट्रिय विषये चर्चा अभवत।

स्वामी महोदयेन सह मेलनार्थं सार्वदेशिकसभायाः प्रधान सुरेशचन्द्रआर्य उपमन्त्री श्रीविनयआर्य, महामंत्री श्रीजोगेन्द्रखट्टर, एवं भारतस्वामिमान दिल्ली प्रदेश अधिकारी श्री राजकुमार आर्य आसीत्।






अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।